प्रत्यक् भ्रमति भचक्रं मेधीकृत्य ध्रुवौ नियतम् ।
चक्रकलासमसंख्यैः प्रवहेण भ्राम्यते च तत्प्राणैः ।। ६ ।।

द्वादशराशिविभक्तो भगोल इह, तस्य मध्यवलयं यत् ।
अपयातं घटिकाख्यात् तदर्धंशस् सौम्ययाम्यदिशोः ।। ७ ।।

तत्समतिर्यग्वलयैः प्रविभज्यन्तेऽत्र राशिभागकलाः ।
यत्र क्वापि च दृष्टं ज्योतिर्मेषादिराशिगं तस्मात् ।। ८ ।।

लग्नव्यवहारस्तु भ्रमद्भगोलस्थमध्यवृत्तवशात् ।
स्वाधिष्ठितात्तथोद्यति भिन्ने राशावुडूदयोऽपि भवेत् ।।
निजमन्दपरिधिगोच्चं केन्द्रीकृत्य भ्रमन्ति कक्ष्यासु ।
विहगाः, रविचन्द्रमसोर्भगोलमध्यं स्वमन्दवृतिमध्यम् ।।
अपमण्डलमध्यस्थस्वशीघ्रवृतिसंगतोच्चमन्येषाम् ।
पाताद् विक्षिप्तमुदङ्मृदुवृत्तार्धं, ततोऽन्यार्धम् ।। ११ ।।
चन्द्रादीनां मन्दानुसारतः स्वस्वकक्ष्याः स्युः ।
क्षयवृद्धी सर्वेषां परिधेर्मान्दस्य तु स्वकर्णवशात् ।। १२ ।।
प्राचीं भ्रमतां स्वे स्वे कक्ष्यावलये तु योजनैस्तुल्या ।
लिप्ताभोगाद् भिन्ना गतिर्ग्रहाणां मिथो वापि ।। १३ ।।
प्रत्यग् भ्रमतां तेषां दिनार्धक्लृप्त्यै प्रकल्प्यते स्थायि ।
वलयमुदग्दक्षिणतः समपार्श्वस्थं च दिवसनिशोः ।।
एतन्निरक्षदेशजम् उन्मण्डलमवनिजं ततोऽन्यत्र ।
सममण्डलमपि भिन्नं घटिकावृत्तात् स्वदेशवशात् ।।

(Nīlakaṇṭha, *Golasāra*, 2.1-15)

---

[1] The idea is that if light falls on a plane mirror, the whole surface will be lighted, ill or well, whatever be its slope. Hence phases of the Moon which we actually see cannot occur if its surface is plane.

The Celestial sphere and the planets

The Earth, a regular sphere, composed of mud etc. and sustaining itself by its own power and situated at the middle of the celestial globe supports all things around it. (1)

Since all weighty things fall on the Earth from the sky all around, the Earth is 'down' from everywhere and any direction opposite to it (i.e., pointing away from the Earth) is 'up'. (2)

The atmosphere extends some *yojanas* into the sky, all round the Earth. Above that, the wind known as *Pravaha* blows, causing the celestial bodies to revolve. (3)

That region upon the Earth where *all* the stars revolving in that (*Pravaha*) region can be seen rising one after another, and where the Pole stars are (exactly) on the two sides, is called the region of Zero latitude (i.e., the Equatorial region). (4)

The revolving vertical circle there (i.e., the Prime vertical at that region) is called the *Ghaṭikā-maṇḍala*[1] (Hour circle). On both sides of that are the different fixed Diurnal circles of the heavenly bodies.[2] (5)

The stellar sphere is constantly revolving westwards with the two Celestial Poles as the apices and is rotated by the *Pravaha* wind (completely once) in (a period containing) *prāṇa-s* equal in number to the minutes of arc in a circle, (viz., 21,600), (i.e., in one sidereal day).[3] (6)

This celestial globe is divided into twelve *rāśis*; the central great circle, (called *Apakrama-vṛtta* or the Ecliptic), is inclined to the Celestial Equator[4] so that one half of it lies to the north of it and the other to the south. (7)

This (circle, *viz*., the Ecliptic) is divided into *rāśis* (segments of 30°), *bhāgas* (degrees) and *kalās* (minutes) by circles perpendicular to it, so that, a body, wherever it may be seen (on the Celestial sphere) lies in one of the *rāśis, Meṣa* etc.[5] (8)

The reckoning of *Lagna* (Rising point of the Ecliptic) is in relation to the central circle of the revolving celestial sphere, (*viz*., the Ecliptic). Hence, at the moment of the rising of the *Lagna* in a particular *rāśi*, a star in a different *rāśi*, may also be rising.[6] (9)

The planets move in their orbits with centres at the Higher Apses of their Epicycles of the Equation of the centre. For the Sun and the Moon, the centre of the celestial sphere is the centre of the above epicycles. (10)

For the other (planets), the centres (of their *Manda* circles) are on (the circumference of) their *Śighra* circles concentric with the Ecliptic. One half of their *Manda* circles is deflected northwards from the Ascending Node, and the subsequent half southwards. (11)

The Moon and other (planets) have their respective orbits increasing according to (the changes in their *manda* (circles).[7] And for all (planets), the increase and decrease of the circumference of the *manda* circles depend upon their hypotenuse.[8] (12)

Of the planets which move, each in its own orbit, eastwards (in relation to the stars fixed on the celestial globe which, as a whole, is moving westwards), the motion in *yojanas* is equal. But their (angular) motion in minutes is different (for the same planet at different positions) as also from one another's (owing to variance in the hypotenuse and the magnitude of the orbits, respectively.) (13)

To fix the midday for these (planets) which move (apparently) westwards, a fixed north-south-lying great circle situated equally on both sides of (mid)day and night is presumed. (14)

This (circle) is the horizon at the equator, and is called *Unmaṇḍala* elsewhere. In regions other than the equator, the *Samamaṇḍdala* (which coincides with the Hour circle at the equator), too, varies from place to place, (i.e., in different terrestrial longitudes). (15). (KVS)

4. 17. 1. विषुवत्संस्थो भानुर्लङ्कायां नभसि मध्यरेखायाम् ।
भ्रमति ह्यपराभिमुखं निरक्षदेशे तथैव सर्वत्र ।। १८ ।।
अर्कः स एव मेरौ भ्रमति समन्तात् क्षितेस्तु पार्श्वगतः ।
अन्यत्र स्वाक्षवशात् खमध्यभूपार्श्वयोर्भ्रमति मध्ये ।।१९।।
अचलानि भानि तेषामधः क्रमान्मन्दजीवकुजदिनपाः ।
सितबुधशशिनश्चैते गच्छन्तः प्राङ्मुखं स्वगत्या तु ।।२०।।

[1] It is so called because time, in units like the *ghaṭikā*, are measured on it. The term *Viṣuvan-maṇḍala* (Equinoctial) is also applied to this great circle.

[2] These are known by the name *dyu-vṛtta* or *ahorātra-vṛtta*.

[3] A sidereal day is equal to 60 *nāḍikās*, a *nāḍikā* equal to 60 *vināḍikās* and a *vināḍikā* equal to 6 *prāṇas*; hence, one day is equal to $60 \times 60 \times 6 = 21{,}600$ *prāṇas*.

[4] This obliquity is equal to 24°.

[5] The Ecliptic is divided into 12 *rāśis* called *Meṣa* etc. commencing from a point situated near the junction-star called Zeta Piscium in the asterism of Revatī.

[6] This may happen in the case of stars which are removed from the Ecliptic.

[7] That is, the hypotenuse got in the *Manda*-operation is the radius of the orbit on which the planet is measured after this operation. This is a peculiarity of the school of Āryabhaṭa.

[8] This is another peculiarity of the Āryabhaṭan school. The mutual dependence is resolved by resorting to what is called *aviśeṣakriyā* or successive approximation.

अपराभिमुखं गोलभ्रमणात् सर्वे भ्रमन्ति लङ्कायाम् ।
घटकारकस्य चक्रे विलोमगाः कीटका यथा तद्वत् ।। २१ ।।

अधउपरिगतखगानां प्राग्गत्या योजनानि तुल्यानि ।
सर्वेषां दिवसे स्युस्तथापि तेषां कलागतिर्भिन्ना ।। २२ ।।

कक्ष्याल्पाधःस्थस्य ग्रहस्य, महती तथोर्ध्वगस्य भवेत् ।
स्वल्पायां च महत्यां लिप्ता भागाश्च राशयस्तुल्याः ।।

पूरयति चाल्पवृत्ते चरन्निजं वृत्तमल्पकालेन ।
महता कालेन चरन् महति दिने गतिकलास्ततो भिन्नाः ।।

पूर्वपक्षः

दृश्यन्ते सर्वखगा अपराभिमुखं भ्रमन्त एवेह ।
एवं स्थिते ग्रहाणां पूर्वगतिः कल्प्यते कया युक्त्या ।।

समाधानम्

दस्रयुतः शीतकरो ह्यपरदिने दृश्यते यमर्क्षस्थः ।
भौमादयश्च तद्वत् पूर्वगतिर्निश्चिता ततस्तेषाम् ।। २६ ।।

पूर्वपक्षः

मन्दगतिरिन्दुरार्किः शीघ्रगतिस्तारकास्तु शीघ्रतराः ।
गच्छन्त्यपराभिमुखं सर्वेऽप्येवं वदन्ति किल केचित् ।।

समाधानम्

मन्ये तदपि न युक्तं यस्माद्वक्रिग्रहोऽनलर्क्षस्थः ।
तत्पश्चिमगभरण्यां दिनान्तरे दृश्यते न पूर्वदिशि ।।२८।।

(Par., *Gola.D.*, 2.18-28)

The true eastward motion of planets

The Sun on the Celestial equator at Laṅkā moves in the heavens westwards along the Prime vertical, and so also at all places on zero latitude. The same (Equinoctial) Sun moves around along the horizon at Meru. At other places it moves between the zenith and the horizon according to the latitude (of the place). (18-19)

The stars are stationary. Below them are, in order, Saturn, Jupiter, Mars, the Sun, Venus, Mercury and the Moon, all moving eastwards by their individual motion, and westwards with reference to (places on zero latitude, like) Laṅkā, due to the rotation of the entire Starry sphere, in the same manner as insects on a potter's wheel moving in a direction opposite (to that of the wheel). (20-21)

The (distance in) *yojanas* covered per day by all planets, whether high or low, (*i.e.*, distant or near) in their easterly motion is the same. But their motion in terms of minutes of arc is diverse. (22)

The orbit of a planet which is low down is small and that of one high up is great. The number of minutes, degrees and signs is the same in both small and big circles. Moving along a smaller circle, a planet completes its circle in a shorter time, and moving along a bigger circle (completes it only) in a longer period. Hence the number of minutes covered in a day varies (from one planet to another). (23-24)

(*Objection*). All the planets are seen moving only westwards. This being the case, by what reasoning is their easterly motion presumed? (25)

(*Answer*). The Moon (seen) in conjunction with the *Aśvinī* constellation, is seen the next day in (conjunction with) *Bharaṇī*.[1] Mars and other planets also behave in the same way. Their easterly motion is determined from this. (26)

(*Objection*). The Moon is slow; Saturn moves fast; and the stars are faster still. All move westwards. (If we suppose thus, then also will they behave as stated in verse 26): So argue some. (27)

(*Answer*). We assert, however, that this (explanation), too, is wrong, because a retrograde planet in *Kṛttikā*[2] is seen a few days later in Bharaṇī which is to its west, and not in an easterly position. (28). (KVS)

ग्रहचारः

4. 17. 2. सर्वेषां कक्षार्धं सममभितः कुदलवर्जितं दृश्यम् ।
भूगोलान्तरितं यत् कुदलेन संयुतमदृश्यम् ।। ३५ ।।

कक्षा मध्यगतिघ्न्यः स्फुटगत्याप्ताः परिस्फुटा भवन्ति ।
स्वमृदुकर्णकलाहता विभाजितास्त्रिगृहमौर्व्या वा ।। ३६ ।।

मध्यमकक्षावृत्ते मध्यमया गच्छति ग्रहो गत्या ।
उपरिष्टात् तल्लब्ध्या तदधिकगत्या त्वधस्थः स्यात् ।।

वक्री यात्यपराशां निसर्गतो गच्छति ग्रहः प्राचीम् ।
क्रान्त्या याम्योदीच्योर्ग्रहगतिरेवं भवेत् षोढा ।। ३८ ।।

स्फुटकक्षया यदाप्तं नाड्यादि क्ष्मार्धषष्टिसंवर्गात् ।
तेनोदितोऽप्यनुदितो नास्तमितोऽप्यस्तमुपयाति ।। ३९ ।।

(Lalla, *SiDhVṛ.*, 19. 35-39)

Planetary Motion

Whatever is obtained by subtracting the Earth's radius from the radius of the orbit of a planet, is the portion visible (to man). And whatever is obtained by the semi-diameter of a planet's orbit increased by the semi-diameter of the Earth, remains hidden from the Earth. (35)

The (mean) orbit of each planet multiplied by its mean motion and divided by its true motion, gives the corrected measure of the orbit.

Or, the (mean) orbit multiplied by the *manda* hypotenuse in minutes of the planet, and divided by the radius, gives the corrected result. (36)

[1] The *Aśvinī* constellation is called *Dasra* because it is presided over by the *Aśvins*, also called *Dasrau*. *Bharaṇī* is called *Yama* because its presiding deity is Yama, the God of death.

[2] The God *Anala* (Fire) is the presiding deity of *Kṛttikā*.

A planet moves along its mean circular orbit at the rate of its mean motion. When it is above (its mean orbit), it moves at a slower rate, and when below, at a higher rate. (37)

A planet naturally moves to the east, but, when retrograde, to the west. It is drawn towards north or south by its declination. Thus the motion of a planet is of six kinds. (38)

Whatever *nāḍīs* are obtained from the division of the product of the Earth's semidiameter and 60, by the true circumference of a planet's orbit, give the horizontal parallax of the planet (in terms of *nāḍīs*). If the planet has theoretically risen so many *nāḍīs* before, it has not risen actually; and if theoretically it is to set so many *nāḍīs* afterwards, it actually appears to set even now. (39). (BC)

दैनंदिनं ग्रहभ्रमणम्

4. 17. 3. अपमण्डले तु सूर्यः पूर्वाभिमुखः सदा चरति ।
भवति ह्यपराभिमुखं वेगाधिक्यात्तथापि गोलस्य ।। १ ।।

प्रवहमरुत्प्रक्षिप्तो भगोल उर्वीं प्रदक्षिणीकृत्य ।
अपराभिमुखं षष्टचा घटिकाभिर्भ्रमति भूयोऽपि ।। २ ।।

भूपृष्ठादुपरि मरुद् 'रवि'योजनसम्मितान्तरे प्रवहः ।
नियतगतिरपरगः स्याद् भूवायुरधश्च तस्य भिन्नगतिः ।।

घटिकाख्यषष्टिभागभ्रमणे कालोऽत्र नाडिकेत्युदिता ।
न तु दिवसषष्टिभागो गोलभ्रमणाद्यतोऽधिको दिवसः ।।

भूपार्श्वगतं क्षितिजं तदूर्ध्वगास्तूदिता ग्रहा दृश्याः ।
भूमितनुव्यवधानात् तस्याधःस्था ग्रहा न दृश्यन्ते ।।

इति गदितं शास्त्रेषु क्षितिपृष्ठादूर्ध्वगा ग्रहा ह्येव ।
अस्माभिर्दृश्यन्ते कुपृष्ठतोऽधोगता न दृश्यन्ते ।। ६ ।।

अपमगतत्वाद् भानुस्तस्य स्थानानुसारतः सौम्ये ।
याम्ये वा यात्युदयं मध्यदिशस्तद्वदेव चास्तमपि ।। ७ ।।

चन्द्राद्या विक्षेपादपमादपि सौम्ययाम्यदिक्स्थाः स्युः ।
साक्षे देशे ह्युदयाद् याम्ये यान्ति ग्रहा नभोमध्यम् ।।

प्रागुन्मण्डलगोऽर्कस्त्रिंशद्घटिकाभिरेति पश्चिमगम् ।
उन्मण्डलं, ततोऽपि च तावत्कालेन पूर्वगतम् ।। ९ ।।

अत्र तु घटिकाशब्दो दिनषष्टयंशस्य वाचकः प्रोक्तः ।
व्यवहारो ह्यनयैव स्याद् गोलभ्रमणतोऽन्यत्र ।। १० ।।

क्षितिजे ह्युदयास्तमयौ सौम्ये तून्मण्डलादयः क्षितिजम् ।
तस्मात्सौम्ये गोले त्रिंशद्घटिकाधिकं दिनं भवति ।।११।।

याम्ये तूर्ध्वं क्षितिजं त्रिंशद्घटिकात ऊनमत्र दिनम् ।
दिनवृद्धौ तु निशोना निशाधिका तत्क्षये तु सर्वत्र ।।१२।।

त्रिंशद्घटिका दिवसो निरक्षदेशे सदा निशा च तथा ।
उन्मण्डलमेव यतः क्षितिजाख्यं मण्डलं भवेत्तत्र ।। १३ ।।

(Para., *GolaD*, 2.1-13)

Diurnal motion of planets

The Sun is constantly moving eastwards along the Ecliptic; still, on account of the more rapid (westward) rotation of the (Starry) sphere (of which it also forms a part), it (appears) to move westwards. (1)

The Starry sphere, impelled by the Pravaha wind, keeps on rotating westwards round the Earth in the *pradakṣiṇa* (clockwise) direction once in 60 *ghaṭikās*. (2)

Above the surface of the Earth, at a height equal to 12 *yojanas*, the Pravaha wind blows with a constant westward motion. Below it (i.e., up to a height of 12 *yojanas*) is the terrestrial wind; (the direction of) its motion is diverse. (3)

By *ghaṭikā* (or *nāḍikā*) is meant the time required for the rotation (of the Celestial Equator) through its one-sixtieth part, and not one-sixtieth of the duration of a (*sāvana*) day,[1] for the day is (a little) longer[2] than the time of rotation of the (Starry) sphere.[3] (4)

The horizon is the horizontal circle around the Earth. Planets become visible when they rise above it. Planets below it are not seen, being hidden by the body of the Earth. (5)

So is it said in the ancient texts. (6a)

(However,) only those planets which rise above (the level of) the Earth's surface (*viz.*, the visual or sensible horizon) are seen by us; and those below (the level of) the Earth's surface are not visible.[4] (6a-b)

Since the Sun is on the Ecliptic (which is inclined to the Celestial Equator), it rises (a little) to the north or south (of the central point, *viz.*, due east) according to its position; it also sets accordingly.[5] The Moon and other (planets) move further north or south than the Ecliptic due to their Celestial latitude (*viksepa*). (7-8a)

In places having (north) latitude (i.e., north of the terrestrial equator), the planets reach the centre of the heavens (*viz.*, the Celestial Meridian) at a more southerly position than at their rising.[6] (8b)

---

[1] The *sāvana* day is from sunrise to sunrise.

[2] The difference between a *sāvana* day and a *nākṣatra* day is about 10 *vināḍikā-s* or 4 minutes.

[3] That is called the Sidereal (or *nākṣatra*) day.

[4] The difference in the position of planets viewed from the surface of the Earth and from the centre of the Earth is termed *lambana* or parallax.

[5] The angle subtended by the east or west point and the point of rising or setting, respectively, is callled the amplitude.

[6] This is generally known as 'Southing'. For places south of the equator, however, the deflection will be to the north. This phenomenon for the southern hemisphere is not envisaged by Indian astronomers and hence 'Northing' is not separately described here.

The Sun on the eastern *Unmaṇḍala* reaches the western *Unmaṇḍala* in 30 *nāḍikās,* and from there in an equal length of time, it reaches the eastern (*Unmaṇḍala*). (9)

Here by *ghaṭikā* (*nāḍikā*) is meant one-sixtieth of the (*sāvana*) day. This will be its connotation elsewhere except in the case of the rotation of the Starry sphere. (10)

Rising and setting take place on the horizon. In the northern (hemisphere) the horizon is below the *Unmaṇḍala*. Hence (when the Sun is) in the northern hemisphere the day will be more than 30 *ghaṭikās*. In the southern (hemisphere) the horizon is above the *Unmaṇḍala*; and so, here, the day is less than 30 *ghaṭikās*. At all places, as the day increases, night becomes shorter, and as it shortens, the night grows longer. (11-12)

At places of zero-latitude (i.e., on the equator), the day is (always) 30 *ghaṭikās*, and so also the night, since there the *Unmaṇḍala* itself is the horizon (13). (KVS)

मन्दशीघ्रवृत्तानि

4. 18. 1. ग्रहभ्रमणवृत्तानि गच्छन्त्युच्चगतीन्यपि ।
मन्दवृत्ते तदर्केन्द्वोर्घनभूमध्यनाभिकम् ।। १६ ।।
मध्यार्कगति चान्येषां तन्मध्यं शीघ्रवृत्तगम् ।
तेषां शैघ्र्यं भचक्रान्न विक्षिप्तं गोलमध्यगम् ।। २० ।।
शैघ्रत्वेन तदंशैः स्वं प्रमायोक्तं ज्ञशुक्रयोः ।
मन्दवृत्तस्य चैवात्र क्षयवृद्धी स्वकर्णवत् ।। २१ ।।
(Nīlakaṇṭha, *Si.Dar.*, 19-21)

Epicycles of the eq. of the centre and conj.

(The centres of) the circles along which (the mean motion of) the planets take place, move on (the circumference of) the epicycle of the equation of the centre (i.e. *manda* epicycles) with the velocity of the Higher apses. (19 a-b)

In the case of the Sun and the Moon it (i.e., the *manda* epicycle) has its centre at the centre of the Earth-sphere. (19 c-d)

For the other (five planets) the centre (of the *manda* or 'slow' epicycle) moves on (the circumference of) the epicycle of the equation of conjunction, (i.e., the *śīghra* or 'fast' epicycle) with the mean velocity of the Sun. (20 a-b)

The centre of their *śīghra* epicycle is the centre of the (celestial) globe itself and (the planes of) these (epicycles) are not oblique to (that of) the ecliptic; (i.e., they are in the same plane as the ecliptic.)[1] (20 c-d)

[1] The idea is that the 'fast' (*śīghra*) epicycles are concentric with the ecliptic and lie in its plane and that the celestial latitude (*vikṣepa*) of the planets is caused by the deflection of the 'slow' (*manda*) epicycles which move on the circumference of the 'fast' (*śīghra*) ones. The maximum deflection of each planet is given in verses 8c-9a.

In the case of Mercury and Venus, their own orbits are stated to be the same as their *śīghra* epicycles, measuring them with respect to their *śīghra* epicycles (which are taken as 360 degrees).

In the case of these, the increase and decrease of the *manda* epicycles alone are according to the hypotenuse (extended from the centre of the *manda* epicycle to its circumference where the planet is). (21). (KVS)

प्रतिमण्डले कक्ष्यामण्डले च ग्रहगत्यादेशः

4. 19. 1. ज्ञातभोगग्रहं वृत्तं सर्वत्र प्रतिमण्डलम् ।
कक्ष्यावृत्तं च तत्तुल्यं ज्ञेयभोगप्रदेशगम् ।। २२ ।।
त एवाप्युच्चनीचाख्ये बहिश्चेदितरेतरम् ।
तद्व्यासार्धान्तरे चान्ये तन्मध्यान्तरनिर्मिते ।। २३ ।।
ग्रहोच्चयोर्विपर्यस्तौ भोगावप्यत्र कल्पयेत् ।
तिर्यक्त्वे ज्ञेयभोगात्तत् कोटीव्यासदले तयोः ।। २४ ।।
दोर्भेदो वा युतिः क्षेपस्तन्मध्यग्रहगोलगः ।

भुजादिलक्षणम्

दोःकोटिभुजयोर्योगः कर्णबाहुचतुर्भुजः ।। २५ ।।
कक्ष्यामध्योच्चनीचस्पृक्सूत्रखेटान्तरं भुजा ।
कोटिस्तदुच्छ्रितिः कर्णः कक्ष्यामध्याद् ग्रहान्तरम् ।। २६ ।।
(Nīlakaṇṭha, *Si. Dar.*, 22-26)

Projection of planetary motion on Eccentric and Orbital Circles

In all cases, the circle on which the velocity of a planet is measured (from fundamentals) is termed the 'eccentric circle' (*pratimaṇḍala*). And, that circle on which the motion of the planet is to be (projected and) understood (i.e. measured) is termed the 'orbital circle' (*kakṣyā-maṇḍala*). (22)

When they are one outside the other, (the outer) one is called the 'upper' (*ucca*) (circle) and (the inner) one 'lower' (*nīca*) (circle). (23 a-b)

Here, the two circles of radii equal to the difference between the centres of the orbital and eccentric circles are drawn at the extremities of the line joining the two centres; these two will then be the *ucca* (upper) and *nīca* (lower) circles. (23 c-d)

The motions of the planets and the Higher apses are to be taken here in opposite directions. (24 a-b)

When the eccentric circle (*jñātabhoga-vṛtta*) is oblique in relation to the orbital circle (*jñeyabhoga-vṛtta*), their cosines (*koṭi*) are to be taken as their radii. And the difference or sum, (as the case may be), of the sines of the two circles is to be taken as the latitude of the eccentric circle. (24c-25b)

Definition of bhuja etc.

The sum of the squares of the sine (*doḥ-bhuja*) and cosine (*koṭi-bhuja*) is a square with the hypotenuse as a side. (25-c-d)

The sine is the (perpendicular) distance from the planet to the line joining the upper (*ucca*) and lower (*nīca*) points through the centre of the orbital circle. The cosine is the height of the perpendicular to the planet (from the centre of the orbital circle). And the hypotenuse is the distance from the centre of the orbital circle to the planet. (26). (KVS)

4. 19. 2. कक्ष्याप्रतिमण्डलगा भवन्ति सर्वे ग्रहाः स्वचारेण ।
मन्दोच्चादनुलोमं प्रतिलोमं चैव शीघ्रोच्चात् ।। १७ ।।
कक्ष्यामण्डलतुल्यं स्वं स्वं प्रतिमण्डलं भवत्येषाम् ।
प्रतिमण्डलस्य मध्यं घनभूमध्यादतिक्रान्तम् ।। १८ ।।
प्रतिमण्डलभूविवरं व्यासार्धं स्वोच्चनीचवृत्तस्य ।
वृत्तपरिधौ ग्रहास्ते मध्यमचाराद् भ्रमन्त्येव ।। १९ ।।
यः शीघ्रगतिः स्वोच्चात् प्रतिलोमगतिः स्ववृत्तकक्ष्यायाम् ।
अनुलोमगतिर्वृत्ते मन्दगतिर्यो ग्रहो भवति ।। २० ।।
अनुलोमगानि मन्दात् शीघ्रात् प्रतिलोमगानि वृत्तानि ।
कक्ष्यामण्डललग्नस्ववृत्तमध्ये ग्रहो मध्यः ।। २१ ।।
(Āryabhaṭa I, *ABh.*, 3. 17-21)

(The mean planets move on their orbits and the true planets on their eccentric circles). All the planets, whether moving on their orbits (*kakṣyā-maṇḍala*) or on the eccentric circles (*prati-maṇḍala*), move with their own (mean), motion, anticlockwise from their apogees and clockwise from their *śīghroccas*. (17)

The eccentric circle of each of these planets is equal to its own orbit, but the centre of the eccentric circle lies at a distance from the centre of the solid Earth. (18)

The distance between the centre of the Earth and the centre of the eccentric circle is (equal to) the semi-diameter of the epicycle (of the planet). (19a)

All the planets undoubtedly move with mean motion on the circumference of the epicycles. (19b)

A planet when faster than its *ucca*, moves clockwise on the circumference of its epicycle, and when slower than its *ucca*, moves anticlockwise on its epicycle. (20)

The epicycles move anticlockwise from the apogees and clockwise from the *śīghroccas*. The mean planet lies at the centre of its epicycle, which is situated on the (planet's) orbit.[1] (21). (KSS)

[1] For an analytical elucidation and figurative representation of the epicyclic and eccentric theories of Indian astronomy, see Bose, Sen, Subbarayappa, *A Concise History of Science in India*, pp. 111-16; *SiDhi Vṛ.:BC*, pp. 311-24.

छेद्यकविधिः

4. 19. 3. निजकक्षावृत्तं यत्तस्माद् व्यासार्धमण्डलं विलिखेत् ।
तद् द्वादशराश्यङ्कं तस्योर्वी मध्यतः कल्प्या ।। ७ ।।
द्युचरस्यान्त्यफलज्यासमानमपि वर्धितं नयेत् सूत्रम् ।
भूमध्यात् स्वाभिमुखं त्रिभज्यया केन्द्रवृत्तमत्र लिखेत् ।।८।।
परमफलजीवया स्वोच्चनीचवृत्तं लिखेत् स्वकक्षाग्रे ।
स्वोच्चसमानो मध्यो यदा तदोच्चे ग्रहस्थानम् ।। ९ ।।
स्वोच्चात् षड्भाभ्यधिको यदा तदा भवति स्वनीचस्थः ।
दूरेणोच्चग उर्व्याः कर्णवशान्नोच्चगो निकटे ।। १० ।।
अत एव द्युचराणामणुता भवति क्रमान्महत्त्वं वा ।
सवितुश्चासन्नानां दूरगतानां क्रमेणैव ।। ११ ।।
अनुलोमं निजमन्दात् प्रतिलोमं गच्छति स्वशीघ्रोच्चात् ।
कक्षावृत्ते मध्यः स्वकेन्द्रवृत्ते ग्रहः स्पष्टः ।। १२ ।।
वेगः स्वकेन्द्रवृत्ते यः कक्षामण्डलेऽपि स एव ।
मध्यैव गतिः स्पष्टा वृत्तद्वययोगगे द्युचरे ।। १३ ।।
मध्यमतुल्यं स्पष्टं भान्तगते भार्धगेऽपि वा केन्द्रे ।
द्रष्टा पश्यति यस्मात् मध्यस्यातः फलाभावः ।। १४ ।।
स्पष्टं पश्यति यस्मात् मध्यादूनाधिकं नरस्तस्मात् ।
विवरं तयोः फलमृणं धनं च मध्यग्रहे क्रियते ।। १५ ।।
अन्त्यफलज्याग्रात् कोटिरुपरि केन्द्रे मृगादिगे यस्मात् ।
कीटादिगते चाधस्तत्र तदैक्यान्तरं कोटिः ।। १६ ।।
कोटिफलमुपरि यस्माद् वान्त्ये प्रथमे पदे भवेत् त्रिगुणात् ।
मध्यमयोश्च यतोऽधस्ततो युतिर्वान्तरं कोटिः ।। १७ ।।
भूग्रहमध्ये कर्णः स्वकर्णमध्यग्रहान्तरे च फलम् ।
भवति सदा बाहुज्या ग्रहनीचोच्चरेखान्तः ।। १८ ।।
मध्यैव योक्ता हि गतिर्ग्रहाणां
स्पष्टा गतिः सैव च पर्ययास्ते ।
वक्रोदये दृष्टिवशाद् विकारा-
स्तेभ्यो हि नान्ये भगणा भवन्ति ।। १९ ।।
(Lalla, *SiDhVr.*, 14. 7-19)

Diagrammatic representation

(With any point as centre) and the given radius, describe a circle which is the circular orbit of the planet or *kakṣāvṛtta*. Divide its circumference into 12 Signs (following the 12 Signs of the zodiac). Assume that the Earth is at the centre of this circle. (7)

From the centre of the Earth draw a vertical line upwards equal in length to the radius of the epicycle of the planet or *antyaphalajyā* or R sine of the maximum correction. With the extremity of this line as centre and the given radius (equal to that of the *kakṣāvṛtta*), describe a circle. It is the eccentric circle or *kendra-vṛtta*. (8)

Or, (draw a vertical diameter in the circular orbit). With the upper end of that diameter as centre and radius

equal to the radius of the epicycle, describe a circle. This is known as the epicycle or *nīcoccavṛtta* of the planet. If the mean place of the planet is at the apogee or *ucca* of the circular orbit, its true place is at the apogee or *ucca* of the epicycle. (9)

When a planet is at a distance of 6 Signs from its apogee, it is said to be at the perigee or *nīca*. When a planet is at the apogee, it is farthest from the Earth; when at the perigee, it is nearest to the Earth. This is so because of the (difference in length of the) hypotenuse in each case. (10)

Thus, the planets appear small or large accordingly. In the same manner, they appear small or large, according as they are near the Sun or removed from it. (11)

A planet moves in the direction of the Signs of the zodiac from its *manda* apogee or *mandocca* (apex of slow motion) and in the opposite direction from its conjunction or *śīghrocca* (apex of quick motion).

The mean planet moves along the circular orbit or concentric and the true planet along the eccentric. (12)

The rate of motion of the true planet in the eccentric is the same as that of the mean planet in the concentric. When the planet is at the points of intersection of these two circles, its mean motion is the same as its true motion. (13)

When the anomaly is either 6 Signs or 12 Signs, the observer sees the mean planet and the true planet in the same straight line. Therefore, at these places the mean planet has no correction. (14)

Since, (for other values of the anomaly), an observer sees the true planet either ahead or behind its mean place, the difference of these positions, that is, the correction, should either be added to or subtracted from the mean place (to obtain the true planet). (15)

When the anomaly is within 6 Signs beginning with Capricorn, its R cosine is above the R sine *antyaphala*. So their sum is the correct R cosine. Again, when the anomaly is within 6 Signs beginning with Cancer, its R cosine is below the R sine *antyaphala*. So, their difference is the correct R cosine. (16)

When the anomaly is either in the first or fourth quadrant, the *koṭiphala* is above the radius. So, their sum is the correct *koṭi*. When the anomaly is either in the second or third quadrant, the *koṭiphala* is below the radius. So, their difference is the correct *koṭi*. (17)

The distance between the centre of the earth and the true position of the planet is known as the hypotenuse or *karṇa*.

The correction or *phala* is the (arc of the concentric intercepted between the point) where the hypotenuse cuts it and the position of the mean planet.

The R sine of the anomaly, *bāhujyā*, is always the perpendicular distance between the place of the planet and the diameter passing through the apogee and perigee. (18-19).[1] (BC)

ग्रहाणां बिम्बकक्षादिमानम्

4. 20. 1. शशिराशयष्ठ चक्रं तेंऽशकलायोजनानि य-व-ञ-गुणाः ।
प्राणेनैति कलां भूः, खयुगांशे ग्रहजवो, भवांशेऽर्कः ॥
(Āryabhaṭa I, *ABh.*, 1.6)

Measures of Planetary orbs, orbits etc.

Reduce the Moon's revolutions (in a *yuga*) to Signs (*rāśis*) multiplying them by 12 (*lit.* using the fact that there are 12 Signs in a circle or revolution). Those Signs multiplied successively by 30, 60 and 10 yield degrees, minutes and *yojanas*, respectively. (These *yojanas* give the length of the circumference of the sky). The Earth rotates through (an angle of) one minute of arc in one respiration (=4 sidereal seconds). The circumference of the sky divided by the revolutions of a planet in a *yuga* gives (the length of) the orbit on which the planet moves. The orbit of the asterisms divided by 60 gives the orbit of Sun.[2] (6). (KSS)

4. 20. 2. नृ-षि योजनं, ञिला भूव्यासो-,
ऽर्कन्द्वोर्ध्रिञा गिण, क मेरोः ।
भृगु-गुरु-बुध-शनि-भौमाः
शशि-ड-ञ-ण-न-मांशकाः, समार्कसमाः ॥
(Āryabhaṭa I, *ABh.*, 1.7)

---

[1] For observations, see *ŚiDhVṛ.*: *BC*, II. 228-30.

[2] Thus we have:
Orbit of the sky $= 5,77,53,336 \times 12 \times 30 \times 60 \times 10$ *yojanas*
$= 1,24,74,72,05,76,000$ *yojanas*
Orbit of the asterisms $= 17,32,60,008$ *yojanas*

Orbit of the Sun $= 28,87,666\frac{4}{5}$ *yojanas*

Orbit of the Moon $= 2,16,000$ *yojanas*

Orbit of Mars $54,31,291\frac{1,32,027}{2,87,103}$ *yojanas*

Orbit of (*Śīghrocca* of) Mercury $= 6,95,473\frac{3,73,277}{8,96,851}$ *yojanas*

Orbit of Jupiter $= 3,42,50,133\frac{699}{1897}$ *yojanas*

Orbit of (*Śīghrocca* of) Venus $= 17,76,421\frac{2,55,221}{5,85,199}$ *yojanas*

Orbit of Saturn $= 8,51,14,493\frac{5,987}{36,641}$ *yojanas*

These orbits are hypothetical and are based on the following two assumptions :

(*a*) That all the planets have equal linear motion in their respective orbits.

(*b*) That one minute of arc (1′) of the Moon's orbit is equal to 10 *yojanas* in length.

8000 *nṛ*[1] makes a *yojana*. The diameter of the Earth is 1050 *yojanas*; of the Sun and the Moon, 4410 and 315 *yojanas*, (respectively); of Meru, 1 *yojana*; of Venus, Jupiter, Mercury, Saturn and Mars (at the Moon's mean distance), one-fifth, one-tenth, one-fifteenth, one-twentieth, and one-twentyfifth, (respectively), of the Moon's diameter. The years (used in this work) are solar years. (7). (KSS)

4. 20. 3. द्वात्रिंशत्पञ्चभिर्हृत्वा भूयो भूयस्तदुत्तरैः ।
शुक्रज्योज्ञार्किभौमानां व्यासलिप्ताक्रमं विदुः ॥ ५६ ॥

(Bhāskara I, *MBh.*, 6.56)

Having (first) divided 32 by 5, divide the same number (i.e., 32) again and again by the same (5) as increased by itself in succession (i.e., by 10, 15, 20 and 25): the results thus obtained are known as the minutes of the diameters of Venus, Jupiter, Mercury, Saturn, and Mars, respectively. (56). (KSS)

ग्रहणसिद्धान्तः

4. 21. 1. छादक इन्दुर्भानोः, शशिनो महती च भूच्छाया ।
अर्कात् सप्तमराशौ भूच्छाया वर्ततेऽर्कसमभुक्तिः ॥

छाद्यस्य शीघ्रगत्वात् प्राक् स्पर्शः पश्चिमे विधोर्मोक्षः ।
छाद्यस्याल्पगतित्वाद् विपरीतं तद्द्वयं रवेर्भवति ॥ ४२ ॥

छादकवृत्तं भानोः स्वल्पमतस्तीक्ष्णशृङ्गता भवति ।
छादकवृत्तं शशिनो महदेवातोऽस्य कुण्ठशृङ्गत्वम् ॥४३॥

(Para, *Gola D*, 2. 41-43)

Theory of Eclipses

(Really) the Moon is the hiding object of the Sun, and (the hiding object) of the Moon is the huge shadow of the Earth. This shadow of the Earth will (always) be at the seventh Sign from the Sun, moving with a velocity equal to the Sun's. (41)

In the case of the Moon, since the eclipsed object (*viz.*, the Moon) is faster, the beginning of the eclipse is at the east, and the end at the west. In the csae of the Sun's (eclipse), due to the slower motion of the eclipsed body (*viz.*, the Sun), these two, (the beginning and the end), are the other way. (42)

The orb hiding the Sun, (*viz.*, the projection of the Moon), is small and hence sharp horns are formed. The orb hiding the Moon, (*viz.*, the Earth's shadow), is big and hence it is blunt-horned. (43). (KVS)

भगोलः

4. 22. 1. भूव्यासार्धेनोनं दृश्यं देशात् समाद् भगोलार्धम् ।
अर्धं भूमिच्छन्नं भूव्यासार्धाधिकं चैव ॥ १५ ॥

देवाः पश्यन्ति भगोलार्धमुदङ्मेरुसंस्थिताः सव्यम् ।
अर्धं त्वपसव्यगतं दक्षिणबडवामुखे प्रेताः ॥ १६ ॥

रविवर्षार्धं देवाः पश्यन्त्युदितं रविं तथा प्रेताः ।
शशिमासार्धं पितरः शशिगाः कुदिनार्धमिह मनुजाः ॥

(Āryabhaṭa I, *ABh.*, 4.15-17)

Sphere of the asterisms

One half of the Bhagola as diminished by the Earth's semi-diameter is visible from a level place (free from any obstructions). The other one-half as increased by the Earth's semi-diameter remains hidden by the Earth. (15)

The gods living in the north at the Meru mountain (*i.e.*, at the north pole) see one half of the Bhagola as revolving from left to right (or clockwise); the demons living in the south at the Baḍavāmukha (*i.e.*, at the south pole), on the other hand, see the other half as revolving from right to left (or anticlockwise). (16)

The gods see the Sun, after it has risen, for half a solar year; so is done by the demons too. The manes living on (the other side of) the Moon see the Sun for half a lunar month; the men here see it for half a civil day. (17). (KSS)

खगोलः

4. 23. 1. पूर्वापरमध ऊर्ध्वं मण्डलमथ दक्षिणोत्तरं चैव ।
क्षितिजं समपार्श्वस्थं भानां यत्रोदयास्तमयौ ॥ १८ ॥

पूर्वापरदिग्लग्नं क्षितिजादक्षाग्रयोश्च लग्नं यत् ।
उन्मण्डलं भवेत्तत् क्षयवृद्धी यत्र दिवसनिशोः ॥ १९ ॥

पूर्वापरदिग्रेखाधश्चोर्ध्वा दक्षिणोत्तरस्था च ।
एतासां सम्पातो द्रष्टा यस्मिन् भवेद् देशे ॥ २० ॥

ऊर्ध्वमधस्ताद् द्रष्टुर्ज्ञेयं दृङ्मण्डलं ग्रहाभिमुखम् ।
दृक्क्षेपमण्डलमपि प्राग्लग्नं स्यात् त्रिराश्यूनम् ॥ २१ ॥

(Āryabhaṭa I, *ABh.*, 4.18-21)

Sphere of the Sky, Celestial Sphere

The vertical circle which passes through the east and west points is the Prime vertical, and the vertical circle passing through the north and south points is the meridian. The circle which goes by the side of the above circles (like a girdle) and on which the stars rise and set, is the horizon. (18)

The circle which passes through the east and west points and meets (the meridian above the north point and below the south point) at distances equal to the latitude (of the place) from the horizon is the equatorial horizon (or six o'clock) circle on which the decrease and increase of the day and night are measured. (19)

[1] *Nṛ* is a unit of length whose measure is equal to the height of a man, assumed to be 96 aṅgulas, or 4 cubits.

The east-west line, the nadir-zenith line, and the north-south line intersect where the observer is. (20)

The great circle which is vertical in relation to the observer and passes through the planet is the *dṛṅmaṇḍala* (*i.e.*, the vertical circle through the planet). The vertical circle which passes through that point of the ecliptic which is three Signs behind the rising point of the ecliptic is the *dṛkkṣepavṛtta*. (21). (KSS)

अपक्रमवृत्तम्

4. 24. 1. मेषादेः कन्यान्तं सममुदगपमण्डलार्धमपयातम् ।
तौल्यादेर्मीनान्तं शेषार्धं दक्षिणेनैव ।। १ ।।
ताराग्रहेन्दुपाता भ्रमन्त्यजस्रमपमण्डलेऽर्कश्च ।
अर्काच्च मण्डलार्धे भ्रमति हि तस्मिन् क्षितिच्छाया ।।२।।
अपमण्डलस्य चन्द्रः पाताद् यात्युत्तरेण दक्षिणतः ।
कुजगुरुकोणाश्चैवं शीघ्रोच्चेनापि बुधशुक्रौ ।। ३ ।।

(Āryabhaṭa I, *ABh.*, 4. 1-3)

Ecliptic

One half of the ecliptic, running from the beginning of the sign Aries to the end of the sign Virgo, lies obliquely inclined (to the equator) northwards. The remaining half (of the ecliptic) running from the beginning of the sign Libra to the end of the sign Pisces, lies (equally inclined to the equator) southwards. (1)

The Nodes of the star-planets (Mars, Mercury, Jupiter, Venus and Saturn) and of the Moon incessantly move on the ecliptic. So also does the Sun. From the Sun, at a distance of half a circle, moves thereon the Shadow of the Earth. (2)

The Moon moves to the north and to the south of the ecliptic (respectively) from its (ascending and descending) Nodes. So also do the planets Mars, Jupiter and Saturn. Similar is also the motion of the *śighroccas* of Mercury and Venus. (3). (KSS)

4. 24. 2. भगोलमध्यवृत्तार्धे वायुगोलस्य मध्यतः ।
अपक्रान्ते चतुर्विंशत्यंशैः सौम्येतरराशयोः ।। १६ ।।

(Nīlakaṇṭha, *SiDar.*, 16)

The two halves of the central circle of the celestial globe (i.e. the ecliptic) move away, respectively, towards the north and the south from the central (circle) of the *Vāyugola* (viz. the *Viṣuvan-maṇḍala* or celestial equator) by 24 degrees. (16). (KVS)

अर्काग्रादीनां स्वरूपम्

4. 25. 1. क्षितिजे यत्रार्कयुतिस्तस्मात्पूर्वापराख्यसूत्रान्ता ।
जीवार्काग्राऽस्तोदयसूत्रं पूर्वापरं तदग्राच्च ।। १४ ।।
उन्मण्डलार्कयोगप्रागपरस्वस्तिकान्तरालज्या ।
क्रान्तिज्या, सात्र भुजा, सूर्यस्थितभागगं द्युवृत्तं यत् ।।१५।।
तद्व्यासार्धं द्युदलं कोटिः सा स्यात्, त्रिजीवका कर्णः ।
यस्मिन्वृत्ते सूर्यस्थितभागो भ्रमति तद् द्युवृत्ताख्यम् ।।
क्षितिजोन्मण्डलविवरे द्युवृत्तजीवाभुजा क्षितिज्याख्या ।
क्रान्तिज्यात्र तु कोटिः स्यादर्काग्रा श्रुतिस्त्रिभिस्त्र्यश्रम् ।।

(Para., *GolaD.*, 2.14-17)

Sun's Amplitude, etc.

Sine Amplitude (*arkāgrā*) is the distance in the shape of the sine of the point from where the Sun touches the horizon (i.e., points of rising and setting) to the east-west line.[1] (14a)

The *Astodaya-sūtra*, or the line of rising and setting, is the east-west line joining the two points (of rising and setting, respectively). (14b)

Sine Declination (*Krāntijyā*) is the sine of the (angular) distance between the point where the Sun touches the *Unmaṇḍala* and the east or west point (*Svastika*). Let this be the *bhujā* (altitude). Let the radius of the diurnal circle on which the Sun is, *viz.*, cos. declination (*dyu-dala*) be the *koṭi* (base); the radius of the sphere will (then) be the hypotenuse (*karṇa*) of the right-angled triangle. (15-16a)

The circle along which the position of the Sun moves is called the Diurnal circle (*dyuvṛtta*). (16b)

The sine of the (arc of the) diurnal circle between the horizon and the *Unmaṇḍala* is called *Kṣitijyā*. Let it be the *bhujā*. Let sine declination be the *koṭi* here. Then sine amplitude will be hypotenuse; these three make a (right-angled) triangle. (17). (KVS)

नक्षत्रपरिधिः

4. 26. 1. रवेः षष्टिगुणो भानि प्रत्यगीरयति ह्यतः ।। १५ ।।

(Nīlakaṇṭha, *Si.Dar.*, 15b)

Orbit of the stars

(The Pravaha wind) is driving the stars in a westerly direction (on an orbit equal to) sixty times that of the Sun. (15). (KVS)

आकाशकक्ष्या ग्रहकक्ष्याश्च

4. 27. 1. 'वेदाश्विराम 'गुणितान्ययुताहतानि
चन्द्रस्य शून्यरहितान्यथ मण्डलानि ।
स्वैः स्वैर्हृतानि भगणैः क्रमशो ग्रहाणां
कक्ष्या भवन्ति खलु योजनमानदृष्ट्या ।। ३५ ।।

(Bhāskara I, *M.Bh.*, 7.35)

[1] This angle of amplitude is subtended at the centre of the Earth (or the Earth's surface, which makes little difference) by the point of rising or setting and the east or west point respectively. At the equator, it is equal to the declination and at other places it is a function of the declination and the latitude of the place; sin amplitude=sin decl. sec. lat.

Circle of the sky and the orbits of planets

Multiply the revolutions of the Moon (in a *yuga*) by 32,40,000 and then discard the zero at the unit's place; (this is the length of the circle of the sky in terms of *yojanas*).

(Severally) divide that by the revolutions of the planets (in a *yuga*); thus are obtained the lengths of the orbits of the respective planets in terms of *yojanaṣ*. (35).[1] (KSS)

ब्रह्माण्डमानम्

4. 28. 1. कोटिघ्नै'र्नखनन्दषट्कनखभूभूभृद्भुजङ्गेन्दुभिर्'
ज्योतिश्शास्त्रविदो वदन्ति नभसः कक्षमिमां योजनैः ।

(Bhāskara II, *SiŚi*, 2.2.67)

Circumference of the sky

Astronomers state that the circumference of the sky is 18,71,20,69,20 multiplied by one crore (i.e. 18,71,20,69,20,00,00,000) *yojanas*. (67). (KVS)

उल्का धूमकेतुश्च

4. 29. 1. शं नो भूमिर्वेप्यमाना शम् उल्कानिर्हतं च यत् ।
शं नो ग्रहाश्चन्द्रमसा शम् आदित्यश्च राहुणा ।
शं नो मृत्युर् धूमकेतुः शं रुद्रास्तिग्मतेजसः ॥

(*AV* 19.9.8-10)

[1] It may be noted that one *yojana* according to the Midnight System is two-thirds of a *yojana* according to the Sunrise system.

Meteors and Comets

Weal for the quaking Earth, and weal for the meteor-smitten. Weal for us be the planets belonging to the Moon and weal the Sun with Rāhu. Weal for us the deadly comet, weal the Rudras of keen brightness. (8-10)

4. 29. 2. दक्षिणां दिशमास्थाय धूमकेतुः स्थितोऽभवत् ।
अनिशं चाप्यविच्छिन्ना ववुर्वाताः सुदारुणाः ॥ ४६ ॥

(*Harivaṃśa Purāṇa*, Cr. Edn., 106.46)

Comets, Meteors etc.

A comet stood forth towards the south; strong winds blew for long and incessantly. (46). (KVS)

4. 29. 3. दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् ।
दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात् ॥

(Varāha, *Bṛ.Saṃ.*, 11.2)

It is not possible to determine by calculation the rising or setting of the comets, since there are three categories of comets, viz. Celestial, Atmospheric and Terrestrial.[1] (2). (M.R. Bhat)

[1] In ch. 11 of his *Bṛhatsaṃhitā*, Varāhamihira takes note and gives the characteristics of one thousand comets, the burden being primarily to indicate the good and evil effects of their appearance.

5. मिथ्याज्ञानम् – ERRONEOUS NOTIONS

मिथ्याज्ञानं तन्निराकरणप्रयोजनं च

5. 1. 1. संस्थानमशेषमीरितं ब्रह्माण्डोदरवर्तिनामिदम् ।
प्रतिवादिवचांसि शृण्वतो मनसि भ्रान्तिरिवावतिष्ठते ॥
यत एवमतः कुहेतुमद्वचनानि प्रथमं ब्रवीम्यहम् ।
उपपत्तिमदागमं ततो मनसः स्थैर्यकरं परिस्फुटम् ॥ २ ॥
(Lalla, *SiDhVṛ.*, 20. 1-2)

Need for removing erroneous notions

Different situations have been ascribed (by different people) on matters relating to the universe. When one listens to the different statements made by opposing schools, doubts, as it were, will assail one's mind. (1)

For this reason, I shall first enumerate the irrational views; and then I shall put forward the truths together with proofs. That will make things clear and thus steady the mind. (2). (BC)

मिथ्याज्ञानानि

5. 2. 1. असुरामरवासरं क्रमादयनं दक्षिणमुत्तरं जगुः ।
हिमदीधितितिग्मतेजसोर्ग्रहणं राहुकृतं तथापरे ॥ ३ ॥
उपरीन्दुमधो दिवाकरं तमसा मेरुभुवा विभावरी ।
प्रतिवासरमिन्दुमण्डलं विबुधैः पीयत इत्यतः कृशम् ॥ ४ ॥
ककुभश्च सुमेरुभूभृतो युगलं चन्द्रमसोस्तथार्कयोः ।
पितृवासरमादितोऽसितं सितपक्षं च वदन्ति शर्वरीम् ॥ ५ ॥
अमितामवनीं प्रचक्षते सुसमां केचन दर्पणोपमाम् ।
अपरे बहुयोजनामिमां सलिलस्थामथ यानपात्रवत् ॥ ६ ॥
कमठाहिवराहदिग्गजैः कुलशैलैर्विधृतामथापरे ।
जगुरूर्ध्वमथ प्रयात्यधो रथचक्रभ्रमवद् भ्रमत्यपि ॥ ७ ॥
(Lalla, *Si Dh Vṛ.*, 20. 3-7)

The several erroneous notions

Some opine that the day of the demons (at the South pole) starts when the Sun goes (from the northern to) the southern solstice; and, that of the gods (at the North pole) starts, when the Sun goes from there towards the northern solstice.

Again, others say that the solar eclipse and the lunar eclipse are caused by Rāhu. (3)

Some say that the Moon is above and the Sun is below. Some others say that the night is caused by the darkness due to the mountain Meru. Yet, others say that the disc of the Moon decreases daily because it is being drunk by the gods. (4)

Some people state that the mountain Meru has directions. Others think that there are two Suns and two Moons. Again, some say that the day of the manes commences with the dark half of the lunar month, and the night, with the bright half. (5)

Some think that the earth is infinite; others, that it is plane as a mirror. Again, others say that it extends to many *yojanas* and floats on water like a boat. (6)

Some opine that the Earth is supported by a tortoise, a serpent, a boar, an elephant or by mountain ranges. Again, others say that the Earth goes up and down; and some say that it goes round and round like the wheel of a chariot.[1] (7). (BC)

अयनोपरि मिथ्याज्ञाननिराकरणम्

5. 3. 1. मिथुनान्तसमीपसंस्थितो यदि यज्ञांशभुजां दिवाकरः ।
सततं समुपैति दृक्पथं न कुलीरे वद केन हेतुना ॥ ८ ॥
अपमस्य वशात् समुन्नमन् क्रमशो यत्र स यत्र वीक्षितः ।
विनमन्नपि तद्वशात् तथा विपरीतं च कथं न दृश्यते ॥ ९ ॥
(Lalla, *ŚiDh Vṛ.*, 20. 8-9)

Doubts on Solstice removed

If the Sun is always visible to the gods when it is near the end of Gemini, then, for what reason, pray, it is not visible when in Cancer? (8)

If the Sun is visible to the gods while ascending due to (the increase) in the declination, why should it not be

[1] In these verses Lalla mentions some of the beliefs prevailing then with regard to astronomical phenomena. Most of these beliefs occur in the Purāṇas.

The views are as follows :

1. The day of the observers at the North pole begins when the Sun starts towards the summer solstitial point and that of the observers at the South pole begins, when it starts towards the winter solstitial point.
2. Night falls when the mountain Meru covers the Sun.
3. Directions can be determined at Meru.
4. The dark half of the lunar month is the day of the manes and the light half is their night.
5. Rāhu, a mythical demon or snake, is the cause of eclipses.
6. The Moon's orbit is above that of the Sun.
7. The illuminated portion of the Moon decreases because it is being sucked by the gods.
8. The Earth is infinite.
9. The Earth is plane like a mirror.
10. The Earth is supported in various ways.
11. The Earth moves.
12. There are two Suns and two Moons.

visible to them while descending through the same declination. (9)[1]. (BC).

निशासम्बन्धि मिथ्याज्ञाननिराकरणम्

5. 4. 1. रज्ज्वा सहितो यथा हयो भ्रममाणो निकटेऽथ दूरगः ।
तद्वद् रविमीक्षते सुरा रजनीचक्रपदे समं कथम् ।। १० ।।
पिहिते यदि मेरुणा रवौ मनुजानामिह शर्वरी भवेत् ।
कथयस्व कथं सुधाभुजां रजनी जायत इत्ययुक्तिमत् ।।
दिनभर्तरि याति दक्षिणां वणिजो मेरुसदां सदा निशा ।
सौम्यां सुरविद्विषामजादपरां भूपिहिते नृणामपि ।। १२ ।।
विपरीतदिशा दिवाकराच्छाया दीर्घतरा तरोर्यथा ।
अवनेरपि जायते तथा सुरदैतेयनृणां तथा निशा ।। १३ ।।

(Lalla, *ŚiDh Vṛ.*, 20. 10-13)

Doubts on nightfall removed

How is it that the gods see the same Sun, even when the wheel of darkness (approaches the world), just as one sees a horse attached to a rope going round and round, sometimes near and sometimes at a distance. (10)

If the night of the men in this world is caused by the Meru covering the Sun, tell me how the night of the gods, (who live on the Meru) and feed on nectar, is caused? (Therefore the statement) is irrational. (11)

When the Sun goes to the southern side (of the ecliptic beginning with) Libra, it is always night for the dwellers of Meru. When it moves along the north (of the ecliptic, beginning with) Aries, (it is continuous night) for the demons. When the Sun is hidden by a part of the Earth, it is night also for men. (12)

Just as the shadow of a tree is longer when it is directly opposite to the Sun than at other times, so is the shadow of the part of the Earth (directly) opposite to the Sun. (That shadow causes night in the part which is away from the Sun). (I have thus explained how) the nights of the gods, demons and men come about.[2] (13). (BC.)

मेरुसम्बन्धि मिथ्याज्ञाननिराकरणम्

5. 5. 1. यदुदेति रविः समन्ततः कथमाशास्तदमर्त्यभूभृतः ।
प्राची प्रथमोदयेन चेत् तत्रैवास्तमयेन का भवेत् ।। १४ ।।
केषांचिदुदग् दिवाकरः पुरतः पृष्ठगतः परस्य च ।
इतरस्य तदैव दक्षिणः परमार्थात् ककुभो न कुत्रचित् ।।

(Lalla, *ŚiDhVṛ.*, 20. 14-15)

Doubts on Meru cleared

How can Meru, the dwelling place of the gods, have directions when the Sun rises all round it? If the point where the Sun rises first is called the east point, what will it be called, when the Sun sets there? (14)

The Sun is simultaneously to the north of some and to the south of others. It is again in front of some and behind others. Thus, in reality, there are no directions (for the Meru). (15).[1] (BC)

पितृणां चन्द्रदर्शनम्

5. 6. 1. सवितारमवेक्ष्य शीतगोरुपरिव्टात् पितरः स्वमूर्ध्वगम् ।
असितान्ततिथौ ततः परं न च पश्यन्ति कथं सिते दले ।।

(Lalla, *ŚiDhVṛ.*, 20.16)

Visibility of the Moon to the manes

The manes, living in the upper part of the Moon, see the Sun on their zenith on the day of the new moon. That being so, how is it that they do not see it from the middle of the light half of the lunar month?[2] (16). (BC)

रवेरधश्चन्द्र इति निरूपणम्

5. 7. 1. यदि शीतगुरूर्ध्वमुष्णरश्मे-
रुडुवत् किन्नु भवेत् सदा सितोऽसौ ।
ग्रहणं स भवेद्रवेर्न चेन्दो-
र्भूच्छायाग्रमपास्य दूरगस्य ।। २८ ।।

(Lalla, *ŚiDhVṛ.*, 20.28)

Assertion that the Moon is below the Sun

If the Mooon is above the Sun, will it not always appear illuminated like a star? (If the Moon were above the Sun) there would be no solar eclipse; there would not even be a lunar eclipse, as the Moon would then be (further) away from the extremity of the earth's shadow.[3] (28). (BC)

चन्द्रसम्बन्धि मिथ्याज्ञाननिराकरणम्

5. 8. 1. अथ शापवशात् परिक्षयः स्याद्
विबुधैर्वा शशिनो निपीतमूर्तिः ।
गणितेन चयक्षयौ कथं स्तो
यदि पीतश्च समीक्ष्यते स कृष्णः ।। २९ ।।

(Lalla, *ŚiDhVṛ.*, 20. 29)

---

[1] These verses refute the first belief. According to this belief, observers at the North pole can see the Sun travelling from Capricorn to Cancer and not from Aries to Libra. Lalla's argument is that if the observers at the North pole can see the Sun descending from Aries to Gemini, they should also see it as descending from Cancer to Virgo when the Sun travels exactly along the same diurnal circles. So the current belief cannot be correct.

[2] These refute the second belief. Lalla maintains that the night is not caused by Meru but by the shadow of the Earth.

[1] This refutes the third belief. Lalla says that no direction can be determined at Meru, because there the observer's horizon coincides with the celestial equator and hence there is no east point.

[2] This refutes the fourth belief. Lalla states that the whole of the light half of the lunar month cannot be the day of the manes, because they do not see the Sun after the eighth day.

[3] This refutes the sixth belief. Lalla says that if the Moon were above the Sun, it would always be illuminated like a star. Moreover, it could neither cause a solar eclipse nor could it be obscured by the Earth's shadow.

Views about the Moon corrected

Above the points of intersection of that and the supporting hoops are the two solstices (*ayana*) and the two equinoxes (*viṣuvat*). From the place of the equinox, with the exact number of degrees, as proportioned to the whole circle, fix, by oblique chords, the spaces (*kṣetra*) of Aries and the rest; and likewise another hoop, running obliquely from solstice (*ayana*) to solstice, and called the circle of declination (*krānti*): upon that the Sun constantly revolves, giving light; the Moon and the other planets also, by their own nodes, which are situated in the ecliptic (*apamaṇḍala*), being drawn away from it, are beheld at the limit of their removal in latitude (*vikṣepa*) from the corresponding point of declination. The orient ecliptic point (*lagna*) is that at the

orient horizon; the occident point (*astamgacchat*) is similarly determined. (10-13)

The meridian ecliptic-point (*madhyama*) is as calculated by the equivalents in right ascension (*laṅkodayas*) for mid-heaven (*khamadhya*) above. The sine which is between the meridian (*madhya*) and the horizon (*kṣitija*) is styled the day-measure (*antyā*). (14)

And the sine of the Sun's ascensional difference (*caradala*) is to be recognized as the interval between the equator (*viṣuvat*) and the horizon. Having turned upward one's own place, the circle of the horizon is midway of the sphere. (15)

As covered with casing (*vastra*) and as left uncovered, it is the sphere surrounded by Lokāloka. By the flow of water is ascertained the revolution of time. (16)

One may construct a sphere-instrument combined with quicksilver; this is a mystery; if plainly described, it would be generally intelligible in the world. (17)

Therefore, let the supreme sphere be constructed only according to the instruction of the preceptor (*guru*). (18). (Burgess)[1]

[1] For notes, see *Sū. Si*: *Burgess*, pp. 298-305.

9. वेधशालाः – OBSERVATORIES

केरलेषु महोदयपुरे वेधशाला

9. 1. 1. गोलान्महोदयपुरे रविवर्मदेव
सम्बन्धयन्त्रवलयाङ्कितराशिचक्रात् ।
भानोः कुलीरदशभागगते तुलान्त्यं
लग्नं मया विदितमाशु वदेह कालम् ।।

अपि च—
सुरपतिदिशि दृष्टं गोलयन्त्राद्विलग्नं
घनपटलनिरुद्धे भास्करे सिंहराशौ ।
गतवति दशभागांश्चापराश्यर्धयातं
वद झटिति रवे ! त्वं नित्यकर्मोक्तकालम् ।।

(Śaṅkaranārāyaṇa, Com. on *LBh.*, 3. 20)

Observatory at Mahodayapuram in Kerala, c. A. D. 860

(To the King): Oh Ravivarmadeva, now deign to tell us quickly, reading off from the armillary sphere installed (at the observatory) in Mahodayapura, duly fitted with all the relevant circles and with the Sign (-degree-minute) markings, the time of the rising point of the ecliptic (*lagna*) when the Sun is at 10° in the Sign of Capricorn, and also when the Sun is at the end of the Sign Libra, which I have noted.

Then again—

Oh Ravi, deign to tell us immediately, reading off from the armillary sphere, by means of the reverse *vilagna* method, the time for offering the daily oblations, when the Sun, shrouded under thick clouds, is 10° in the Sign Leo and also when it is the middle (i.e. 15°) in the Sign Sagittarius. (KVS)

काशी-मानमन्दिर-वेधालयः

9. 2. 1. अस्ति श्री-वाराणस्यां भागीरथीतीरे मणिकर्णिकाघट्टान्नातिदूरे दक्षिण-पश्चिम-दिग्भागे राजपुतानाख्यप्रसिद्ध-देशान्तर्वर्त्यामेरसंज्ञ-नगर्याः स्वामिना मानसिंहाभिधेयेन राज्ञा विनिर्मितं सदनमेकं मानमन्दिरसंज्ञकं नाम । तत्र तस्य नृपतेर्वंश्येन प्रतापवता जयसिंहेन भूपेनेतः-पूर्वं सार्धशतवर्षासन्नकाले ग्रहनक्षत्रवेधार्थं रचितानि ज्यौतिषयन्त्राणि तदुपयोगजिज्ञासूनां सहृदयपुरुषाणां रञ्जनायेदानीमहं संक्षेपतो वर्णयामि ।

(Bapudeva, *Mānamandira*, p. 15)

Kāśī Mānamandira Observatory

In Vārāṇasi, on the banks of the Ganges, not far removed from Maṇikarṇikā ghāṭ there is a building, named Mānamandira in the north-west direction, which was constructed by the king named Mānasiṃha of Āmer city in the province of Rājputānā. Approximately 150 years ago,[1] his (Mānasiṃha's) famous descendant Jaya Siṃha installed certain astronomical instruments in that building for observing the planets and stars. Here I am describing them in brief for the pleasure of those scholars who want to know their use. (SDS)

याम्योत्तरयन्त्रम्

9. 3. 1. तत्र 'याम्योत्तर'भित्तिसंज्ञं यन्त्रं दक्षिणोत्तररेखायां चूर्णेष्टकाप्रस्तरैर्निर्मितं कुड्यरूपं सत्र्यंशसप्तहस्तोच्छ्रायं सत्रिलवद्व्यैकाङ्गुलाधिकषड्हस्तपरिणाहं सार्धषोडशांगुलपिण्डं समीचीन-सुधालेपे चिक्कणीकृते तत्पूर्वपार्श्वे भूमेरङ्गुलद्वयोन-'नग'करोच्छ्रितयोरन्योन्यं हस्तपञ्चकेन चतुर्विंशांशाधिकेन विप्रकृष्टयोः तत्पार्श्वोर्ध्वकोणद्वयासन्नदेशयोः रोपितौ लोहकीलौ केन्द्रे कृत्वा कीलान्तरमितव्यासार्धेन लिखिताभ्यां मिथः सम्पातं कुर्वद्भ्यां वृत्तचरणाभ्यां स्वाधोभागे तत्केन्द्रकैरेव क्रमेण पञ्चदशभिर्नवत्यां नवशतेन च समं विभक्तौ त्रिभिस्त्रिभिर्वृत्तचतुर्थांशैः सहिताभ्यामङ्कितं मन्दिरान्तःप्रविशद्भिः यन्त्रदिदृक्षुभिः प्रथममेवोपलभ्यते ।

अस्मिंश्च यन्त्रेऽत्र दक्षिणोत्तरमण्डलं याते सहस्रकिरणे वृत्तचरणे पतितां तत्केन्द्रस्थकीलच्छायां यावद् अपरकीलमूलात् तिग्मरश्मेरुन्नतांशास्तलतश्च नतांशाः प्रत्यहम् अहर्दलेऽवगम्यन्ते । परमिह काश्यामक्षांशानां परमक्रान्तितोऽधिकत्वात् उष्णगभस्तेः खस्वस्तिकादूर्ध्वभागे सञ्चारासम्भवादस्तीह तस्योन्नतलवानामवगमाय याम्यकेन्द्रकस्यैव वृत्तचरणस्योपयोगः । यत् पुनः उदग्-दक्षिण-केन्द्रकयोः वृत्तचरणयोरत्रोल्लेखनं तत् खमध्याद् उत्तरे दक्षिणे च याम्योत्तरमण्डलं सर्वेषामुडूनां वेधाय इत्यतिरोहितं मतिमताम् ।

यन्त्राच्चास्माद् भवति तरणि-परमक्रान्तेरक्षांशानां चावगमः सुगमः । तथाहि—प्रतिदिनं दिनदलेऽर्कस्यावनतलवेष्ववलोकितेषु यावन्तः परमाधिकाः नतांशाः, यावन्तश्च परमाल्पाः अवगम्येरन्, तद्विश्लेषदले परमापमांशाः भवेयुः । तांश्च श्रीजयसिंहमहीपतिरष्टाविंशतिकलाधिकत्रयोविंशतिमितान् निरणयत् । एभिश्चोनीकृतेषु परमाधिकनतलवेषु अधिकीकृतेषु परमाल्पनतांशेषु वा सम्पद्यन्तेऽक्षांशाः ।

एवमवगताक्षांशेऽस्मिन् विषयेऽभीष्टदिने मध्याह्नेऽर्कस्य-नतांशानवलोक्य तांश्चाक्षांशैर्विश्लेष्यावशेषमितं तस्मिन् दिने दिनेशस्य पलांशेभ्यो नतांशानाम् अल्पत्वे सौम्यम् अधिकत्वे च याम्यम् अवगच्छेत् । ततश्चरस्याहर्निशोः प्रमाणस्यारुणभोगस्यावगमः सिद्धान्तविदोऽतिस्पष्टतरः ।।

(Bapudeva, *Mānamandira*, pp. 15-16)

[1] That is about A.D. 1720, being approximately 150 years prior to A.D. 1866 when the present account was written. For an account of the astronomical endeavours of Sawai Jai Singh, see K.V. Sarma, Foreword, and S.D. Sharma, Introduction to *Mānamandira*: *SDS*, pp. ix-xxiv, 1-13.

Yāmyottara-yantra: Mural quadrant

There is a *Yamyottara-yantra* in the North-South direction in the form of a wall made of lime-brick-stone. It is 7 1/3 hands[1] in height, 6 hands and 1 2/3 *aṅgulas* in breadth and 16½ *aṅgulas* in thickness. One of its sides, facing east, is whitewashed and smoothened. On this side, at the points near the top corners, there are fixed two gnomons (*śaṅkus*) made of iron, which are separated by 5 5/24 hands from each other and are fixed at a height of 7 hands less 2 *aṅgulas* from the ground. With the gnomons as centres and the radii equal to the distance between them, there are drawn two intersecting quadrants. Below both these quadrants are the concentric quadrants which are uniformly divided consecutively into 15 parts (of 6° each), 90 parts (of 1° each), and 900 parts (of 6′ each). This instrument can be seen by the visitors at first sight while entering the Mandira.

In this instrument, every day at midday, when the Sun is on the meridian, the shadow of the gnomon falls on the quadrant whose centre is the former. From the base of the other gnomon up to the shadow are the altitude degrees and from the bottom (up to the shadow) are the co-latitude degrees. But in Vārāṇasi the latitude is more than the maximum declination (the obliquity) of the Sun. So it cannot go higher (towards north) than the zenith there. Thus for the Sun, only the quadrant with the centre towards south is useful. Here the graduations of both the north-south (gnomon)-centred quadrants are for the observations of all the stars north or south of the zenith, when they are on the meridian. This (fact) would be evident to the scholars.

With the help of this instrument, the maximum declination of the Sun and the latitude (of the place of observation) can be known easily. Observing the co-altitudes (zenith distances) every day at midday, whatever maximum and minimum zenith distances are observed, half of their difference is the maximum declination. King Jaya Siṃha has determined its value to be 23° 28′. The maximum zenith distance derived by subtracting the maximum declination or the minimum zenith distance by adding to the maximum declination yields the latitude.

Thus, knowing the latitude of the place, note the zenith distance of the Sun on any desired day at midday time. Subtract the latitude from this. The remainder is the declination of the Sun on that day. If the latitude is less than the zenith distance, then the declination is to the north and if the latitude is greater than the zenith distance, then the declination is to the south. From this, the ascensional difference (and hence) the lengths of day and night and also the celestial longitude of the Sun are easily understood by astronomers. (SDS)

एकमज्ञातयन्त्रम्

9. 4. 1. अस्ति चास्याः दक्षिणोत्तरभित्तेः प्राग्भागे तत्सक्तैव तत्तुल्यविस्तारा दैर्घ्ये सप्तकरा पूर्वं जलवत् समीकृता अपि इदानीं किंचिदुच्चावचत्वं गता भुमिः यस्यां तत्पूर्वविदिक्कोणासन्नदेशयोर्भित्तिस्थकीलद्वयसंसाधित-प्राग्दिशि निखातौ सरन्ध्राग्रौ लोहकीलौ द्वौ आस्ताम् । तयोरेक उत्तरदिक्क एवाधुनाऽवशिष्यते । अस्याः भूमेश्च समीपदेशे एव चूर्णेष्टकानिर्मितं साङ्घ्रिनवाङ्गुलाधिकैकहस्तव्यासं समीकृतभूमिकमेकं मण्डलमन्यच्च प्रस्तरमयं समभूमिकं सप्तांगुलाधिकहस्तद्वयव्यासमस्ति । तन्निकट एव चैकं पाषाणघटितं सममहीकमेकमेकादशाङ्गुलोत्तरैकहस्तपरिमितबाहुकं वर्गाकारं चतुरस्रं वर्तते । एतन्मण्डलद्वयं वर्गक्षेत्रं चेदानीं परिमृष्टविभागचिह्नं पूर्वं शङ्कुच्छायां दिगंशांश्चावगन्तुं निरमायीति प्रतिभाति ।

(Bapudeva, *Mānamandira*, p. 16)

An unknown instrument

Towards the east of this north-south wall (where the *Yāmyottarayantra* is placed) there is an adjacent plane with breadth equal to that of the wall and length equal to seven hands. Although it was initially levelled like (the surface of) water, now it is uneven. On this plane there were fixed two pegs of iron with holes at the top. These are fixed along the eastern direction determined by the two gnomons in the wall. At present only one of them, in the east, exists there. Quite near this plane, there is a levelled circular plane made of lime-bricks and with diameter equal to one hand and 9¼ *aṅgulas*. There is also another, (a second), levelled circular plane made of stones and having diameter equal to 2 hands and 7 *aṅgulas*. Nearby this plane there is a levelled square with side equal to 1 hand and 11 *aṅgulas*. The graduations on these two circular platforms and the square are erased now. But it seems that during earlier times these were made use of to ascertain the gnomonic shadow and the azimuth. (SDS)

सम्राट्–यन्त्रम्

9. 5. 1. अस्ति चास्य भित्तियन्त्रस्योत्तरदिशः किंचित् पूर्वदिग्भागे खमध्यस्थया संसाधितदक्षिणोत्तरकाष्ठायां चूर्णेष्टिकापाषाणैर्निर्मितया हस्तत्रयविस्तारया चतुर्विंशतिकरया प्रस्तरमयध्रुवाभिमुख-तिरश्चीनोपरितनभागया दक्षिणदिशि मूलभागे साङ्घ्रिवेदकरैरुत्तरतोऽग्रभागे चाङ्गुलत्रितयोनपञ्चदशहस्तैः उच्छ्रितयान्तर्गतसोपानया शंकुसंज्ञिकया भित्त्या विशिष्टं पूर्वपश्चिमभागयोः प्रत्येकमेकैकेन वृत्तपरिधिचतुर्थांशाभ्यधिकदैर्घ्येण किंचिदूनकरचतुष्टयविस्तारेण सार्धनवांगुलपिण्डेन शंकुपालिस्थितकेन्द्रेण षड्हस्तपरिमितव्यासार्धेन पाषाणमयचापेन सहितं चान्यदेकं यन्त्रसम्राडाख्यं महद्यन्त्रम् । यत्र प्रतिचापमुभयतः पालौ वृत्तचतुर्थांशाः समैः पञ्चदशभिर्घटीविभागैरङ्किताः । सोऽप्येकैको विभागस्तुल्यैः किंचिदूनांगुलत्रयायामैः षड्विभागैः चिह्नितोऽस्ति । शंकुपालौ च प्रतिचापपालिकेन्द्रस्थानमेकैकं लघुलोहमयवलयं वर्तते ।

[1]Hand (*hasta*) refers to the linear measure 'cubit'.

अस्मिन् च यन्त्रे दिवा चापपालौ शंकुमूलात् तत्पालिच्छायां यावत् यावन्तो घटीविभागास्तावत्यो नतघटिकाः शंकोः पाश्चात्यभागे छायापाते मध्याह्नात् पूर्वं पौरस्त्ये च ततोऽनन्तरमवगम्याः । एतच्छायापातस्थानस्य समीपतः सम्यगवलोकनाय प्रतिचापमुभयतः प्रास्तरा आरोहणमार्गा निर्मिताः सन्ति । किन्त्वत्रेदानीमुक्तचापयोः स्वाग्रभागे भारातिशयेन वास्तवस्थानादीषन्नमितत्वादत्रत्यच्छायातः कालज्ञानं किंचित् स्थूलं भवति ।

एवमत्रार्कात् पतिता शंकुपालिच्छाया यद्वद् व्यक्तमवलोक्यते न तद्वत् हिमांशोः स्पष्टा भवति । भौमादिग्रहनक्षत्रेभ्यस्तु छायैव नोत्पद्यते इत्यस्माद् यन्त्रात् कथं तेषां नतकालावगमः स्यादित्येतदर्थमुच्यते—

अत्यन्तमृज्वीं धातुमयीं सूक्ष्मां नलिकां निर्माय तस्याः एकमग्रं चापपालावपरं शंकुपालौ तथा न्यसेत् यथा यस्य ग्रहस्य नक्षत्रस्य वा नतकालो ज्ञातव्यः स चापाधःपालिगतया दृष्ट्या नलिकासुषिरे दृश्यते । तथा च नलिकासक्तचापपालिस्थानात् नतकालावगमः स्फुटः स्यात् । शंकुपालौ च यत्र नलिकासंगस्तस्मात् स्थानात् तच्चापपालिकेन्द्रं यावत् तस्य ग्रहस्य नक्षत्रस्य वा क्रान्तेः स्पर्शरेखा स्यात् । एवमस्माद् यन्त्रात् सूर्यादिग्रहाणां च नतकाला अपमाश्च सम्यगवगन्तुं शक्यन्ते ।

नक्षत्रस्य विषुवकालोऽप्यस्मादवगम्यते । स चैवम्—

अस्तं जिगमिषोर्भास्करस्य नतकालं ततो यावता कालेनावगन्तव्यविषुवकालं नक्षत्रमाकाशे सम्यगवलोक्येत तावान् घटीयन्त्रेणावगम्यः । तस्यार्कनतकालस्य च योगस्तात्कालिकोऽहर्पतेर्नतकालो भवति । स च भास्वतस्तात्कलिकेन विषुवत्कालेन युक्ते दशमलग्नस्य विषुवकालो जायते । सोऽपि तस्य नक्षत्रस्य तत्कालेऽवगतेन नतकालेन प्रागपरकपालक्रमेण युतोनितस्तन्नक्षत्रविषुवकालो भवति ।

(Bapudeva, *Mānamandira*, pp. 16-17)

In this instrument, during daytime, from the base of the gnomon upto the shadow of the *cāpa-pāli* whatever are the *ghaṭī* divisions, these will be the hour angle (in units of *ghaṭī*-timings or the *nata-ghaṭīs*). If the shadow of the gnomon falls on the western side, then take these (*nataghaṭīs*) to be the time left for midday and if the shadow falls on the eastern side then take these to be the time past midday. In order to observe keenly the shadow from nearby positions stony riding passages are made on both the arcs. But because of excessive weight, the arcs are a little inclined from the actual positions near the terminal edges. So, in these parts, the shadow gives time which is somewhat erroneous.

The shadow of the *śaṅkupāli* from the Moon is not so clear as it is from the Sun. Moreover, the planets and the stars do not produce any shadow at all. That being so, how can the hour angles of the planets Mars etc. and those of stars be determined with the help of this instrument? For this, we give the method as follows:

Construct a fine narrow and exactly straight tube out of metal. Place one of its ends on the edge of the arc and the other end on the *śaṅku-pāli* in such a way that the planet or the star whose hour angle is to be determined is visible through the hole of the tube by placing the eye below the *cāpa-pāli*. In this way the hour angle is evidently determined from the point of contact of the tube on the *cāpa-pāli*. From the point of contact of the tube with the *śaṅku-pāli* upto the centre of the *cāpa-pāli* is the tangent line of the declination of the planet or the star. In this manner, the hour angles and declinations of Sun and other planets can be well determined with the help of this instrument.

Also, the *viṣuva-kāla* (right ascension expressed in units of time) of a *nakṣatra* can be determined with the help of this instrument. The method is as follows:

Determine the hour angle of the Sun at the time of its setting. Using a chronometer, note the time interval by which the star whose *viṣuva-kāla* is to be determined, is visible in the sky. The sum of the two is the hour angle of the Sun at that time (i.e., the time when the star is just visible); on adding to this the *viṣuva-kāla* (right ascension in time units) of the Sun, one gets the *viṣuva-kāla* of the *daśama-lagna* (the point of contact of the ecliptic with the meridian). Determine the hour angle of the star at that time and add to or subtract it from the same (i.e., from the *viṣuva-kāla* of *daśama-lagna*), depending upon whether the star is in the eastern or western hemisphere. The result is the *viṣuva-kāla* of the star.[1] (SDS)

Samrāṭ-yantra

Towards the north of the Bhitti-yantra somewhat in the eastern part, there is another big instrument called *Samrāṭ-yantra*. This has a gnomon wall which is set in the precisely determined north-south direction and is made of lime-brick stones. This is 3 hands in thickness and 24 hands in length. Its upper part, which is, made of stones, is inclined and points towards the polaris. In the south, the base is 4¼ hands in height and on the front side in the north, it is 15 hands less 3 *aṅgulas* in height. It has ladders in between. On the eastern and the western sides there are two stony arcs with radii 6 hands and somewhat more than a quadrant each in size. These have breadth somewhat less than 4 hands and their thickness is 9½ *aṅgulas*. Their centres lie on the *śaṅkupālis* (the edges of the gnomon wall). On each arc, there are quadrants which, at the edges, have divisions in 15 equal *ghaṭīs*. Each division is further graduated in uniform six subdivisions which are somewhat less than 3 *aṅgulas* in measure. On the *śaṅkupālis* (on both edges of the gnomon wall) there are two small iron rings, whose centres coincide with the centres of the *cāpapālis* (the edges of the arcs).

[1] For the rationale, see *Mānamandira*: *SDS*, pp. 29-32.

भित्तियन्त्रम्

9. 6. 1. अस्मिन्नपि यन्त्रे शंकोः पूर्वपार्श्वेऽन्यदेकं भित्तियन्त्रं पूर्वोक्तवदेवं विरचितमास्ते । किन्त्वत्र कीलयोर्विप्रकर्षोऽङ्गुलद्वयोनसप्तकरमितोऽस्ति ।

(Bapudeva, *Māmandira*, p. 17)

Bhitti-yantra

In this very instrument, on the eastern side, there is made another *Bhitti-yantra* of the type described earlier, but here the distance between the two gnomons is seven hands less 2 *aṅgulas*. (SDS)

नाडीमण्डलम्

9. 7. 1. अस्माच्च यन्त्रात् पूर्वस्यां दिशि प्रस्तरमेकं नाडीमण्डलाभिधं यन्त्रं विषुवद्वृत्तक्षेत्रे वर्तते । यस्योत्तरपार्श्वेऽङ्गुलद्वयाधिककरत्रयव्यासमूर्ध्वाधरतिर्यग्रेखाभ्यां विहिततुल्यचतुर्विभागं प्रतिपदं नवत्या भागैरङ्कितं केन्द्रमध्यस्थ-ध्रुवाभिमुखलोहकीलं वृत्तं कृतमस्ति । तस्य च कीलस्य छायया सौम्यगोले स्थितस्य रवेर्नक्षत्रस्य वा नतकालः ज्ञायते । एतद्यन्त्रदक्षिणपार्श्वमपि याम्यगोलस्थस्य भस्य भास्वतो वा नतकालावगमाय त्रयोदशाङ्गुलाधिकैकहस्तव्यासेन पूर्ववदूर्ध्वाधरतिर्यग्रेखाभ्यां भांशैश्चाङ्कितेन मण्डलेन मण्डितं वर्तते ।

(Bapudeva, *Mānamandira*, pp. 17-18)

Nāḍī-maṇḍala : Equinoctial circle

Towards the east of the *yantra* described last, there is, in the plane of the celestial equator, another stone instrument called *Nāḍī-maṇḍala*. On its northern side, there is a circle whose diameter is 3 hands and 2 *aṅgulas*. It is divided into four parts by vertical and horizontal lines. Each quadrant is graduated into 90 degrees. At the centre of the circle there is an iron peg pointing towards the polaris. From the shadow of this rod, when the Sun or the *nakṣatra* is in the northern hemisphere, its hour angle is known. Also the south-facing side of this instrument has a circle with diameter equal to 1 hand and 13 *aṅgulas*. This too, like the north-facing side, is divided into quadrants by vertical and horizontal lines and graduated in degrees. This circle is intended to determine the hour angle if the *nakṣatra* or the Sun is in the southern hemisphere. (SDS)

चक्र-यन्त्रम्

9. 8. 1. अस्ति चास्य यन्त्रस्य निकट एव भित्तिद्वयमध्यवर्ति लोहमयं चलमण्डलं बाह्यपालौ पित्तलपत्रेणावृतं ध्रुवाभिमुखव्यासकं अङ्गुलत्रयविस्तारं अर्धाङ्गुलपिण्डं पार्श्वयोर्भांशैः प्रत्यंशं तुल्यैश्चतुर्भिविभागैश्चाङ्कितं केन्द्रस्थकीले प्रोतया अङ्गुलत्रयविस्तारया पित्तलपट्टया विशिष्टं चक्रयन्त्रम् नाम ।

अस्माच्च यन्त्रात् खेटस्य भस्य वा क्रान्तेरवगमाय चक्रं तन्मध्यगतपट्टीं च तथा चालयेद् यथा यस्य क्रान्तिर्ज्ञातुमिष्यते तत्पट्टयधोगतया दृष्टया विलोकितं सत् पट्टीमध्यगतसूत्रे दृश्येत । तथा चास्य ध्रुवाभिमुखव्यासे योऽन्यो लम्बरूपो व्यासः स्यात् तस्य पट्टयाश्च मध्ये यावन्तः परिधावंशास्तावन्तस्तस्य खेटस्य नक्षत्रस्य वा क्रान्त्यंशा वेदितव्याः । अत्रैव यन्त्रे ग्रहनक्षत्राणां नतकालाद्यवगमाय आधारवृत्तादीन्यन्यान्यपि वलयान्यासन् । परमिदानीं तानि नष्टानीति प्रतिभाति । या चात्र पट्टी वर्तते तयेदानीं वक्रत्वंगतया प्रोक्तवत् क्रान्तिज्ञानं न भवति ।

(Bapudeva, *Mānamandira*, p. 18)

Cakra-yantra

Near the very instrument (described last) there is *cakra-yantra*. It lies in between two walls. It is made of iron and is capable of rotating. On the outer periphery, there is a covering with bronze foil. Its diameter points towards the polaris. The periphery is 3 *aṅgulas* broad and $\frac{1}{2}$ *aṅgula* in thickness. On the edges it is graduated in degrees and each degree is further divided into four equal parts. There is a *paṭṭi* (tube device) made of bronze. It is 3 *aṅgulas* broad and passes through a peg at the centre. The same has a thread with a mark (index) in the middle.

To know the declination of a planet or star with the help of this instrument, move the instrument and the *paṭṭi* in such a way that the celestial body, whose declination is to be determined, is visible along the thread to the eye placed below the *paṭṭi*. From the diameter perpendicular to the one facing the pole, the degrees on the periphery up to the *paṭṭi* is the declination of the planet or the star.

In this very instrument there were base circles etc. for determining hour angles of planets and stars, but these have been erased now. The *paṭṭi* is now bent and hence with the help of this instrument described above, the declination cannot be determined accurately. (SDS)

लघुसम्राट्–यन्त्रम्

9. 9. 1. अस्य च प्राग्भागे यन्त्रसम्राडाकारमेवान्यल्लघु यन्त्रं दैर्घ्ये सप्तदशाङ्गुलोत्तरषट्हस्तमितेन विंशत्यंगुलविस्तारेण याम्यभागे सत्र्यंशकराभ्यां सौम्ये च सार्धपञ्चहस्तैरुच्छ्रितेन शङ्कुना विशिष्टमंगुलचतुष्टयाधिकैकहस्तविस्ताराभ्यां पञ्चांगुलपिण्डाभ्यां सत्र्यंशहस्तद्वयविष्कम्भार्धबाह्यपालिभ्यां चापाभ्यां सहितं च वर्तते ।

(Bapudeva, *Mānamandira*., p. 18)

Small Samrāṭ-yantra

Towards the eastern side of the (*yantra* described above) there is a small *yantra* having its construction similar to the *Samrāṭ-yantra*. This has a *śaṅku*-(wall) 6 hands and 17 *aṅgulas* in length and 20 *aṅgulas* in thickness. On the southern side, the height is $2\frac{1}{2}$ hands and on the northern side, it is $5\frac{1}{2}$ hands high. The arcs are 1 1/6 in breadth and 5 *aṅgulas* in thickness. Their edges (*cāpa-pālis*) have a radii equal to 2 1/3 hands. (SDS)

दिगंश-यन्त्रम्

9. 10. 1. अस्ति चास्मात् यन्त्रात् प्राच्यां दिशि विपुलं दिगंशयन्त्रम् । यन्मध्यगतो वृत्ताकारो दशांगुलोत्तरहस्तद्वयव्यासः, पादोनहस्तत्रयोत्सेधः, स्वकेन्द्रस्थाननिखातसरन्ध्राघःकीलः स्तम्भः स्वस्मात् चतुर-

गुलोनकरपञ्चकान्तरे वर्तमानया स्तम्भतुल्योच्छ्राययया रूपहस्तमितविस्तारया भित्त्यावृत्तस्तद्भित्तेरपि किंचिदधिकहस्तद्वयान्तरे बहिर्भागे स्थितयोच्छ्राये पूर्वभित्तेर्द्विगुणया, सत्र्यंशैकहस्तविस्तारयापरभित्त्या चावेष्टितोऽस्ति । अनयोश्च भित्त्योः प्रत्येकमुपरितनभागो दिग्भिर्भांशैश्चांकितो वर्तते । तस्य बाह्यभित्तेश्चोपरि चतुर्दिक्षु चत्वारो लोहकीला निखाताः सन्ति ।

एवंविधमिदं महायन्त्रं दिगंशज्ञानार्थमुपयुज्यते । तथाहि—बाह्यभित्तेरुपरि रोपितयोः पूर्वपश्चिमकीलयोः बद्धस्य सूत्रस्य तथाविधयोर्दक्षिणोदक्कीलयोः बद्धेन सूत्रेण सह सम्पातो मध्यस्तम्भकेन्द्रस्योपरितनदेशे एव वर्तते । ततस्तृतीयस्य प्रगुणस्य सूत्रस्यैकमग्रं स्तम्भकेन्द्रे दृढं बध्वान्यदग्रं बाह्यभित्तिपालौ नीत्वा तथा चालयेद्यथा यस्य ग्रहस्य दिगंशा वेद्यास्तस्मिन् मध्यभित्तिबाह्यपालिगतदृष्टया विलोक्यमाने स ग्रहः प्रोक्तसूत्रद्वयसम्पातश्च तृतीयसूत्रगतौ स्याताम् । तथा च बाह्यभित्तिपालौ प्राक्चिह्नात् पश्चिमचिह्नाद् वा तृतीयसूत्रपर्यन्तं यावन्तोंऽशास्तावन्तस्तस्य ग्रहस्य दिगंशा भवन्ति ।

(Bapudeva, *Mānamandira*, pp. 18-19)

Digaṁśa-yantra

On the eastern side of this instrument there is a big *Digaṁśa-yantra* (an instrument for knowing *digaṁśa* or azimuthal angle). At its middle there is a pillar having a diameter equal to two hands and 10 *aṅgulas* and height equal to $2\frac{3}{4}$ hands. At its centre there is fixed a gnomon with a hole at its bottom. From this pillar at a distance of five hands minus four *aṅgulas* there is an enclosing (circular) wall. Its height is equal to that of the pillar, and its thickness is one hand. From this wall too somewhat more than 2 hands away towards the outer side, there is another enclosing wall. Its height is double that of the first one and the breadth is $1\frac{1}{3}$ hands. The upper sides of both the walls are graduated in directions and degrees. On the outer wall there are pivoted iron pegs in the four directions.

The instrument of this type is used to determine the azimuth. (For this purpose) a thread is fastened to the eastern and western pegs and another to similar pegs fixed at the north and the south points. The two threads intersect at the centre of the pillar in the middle. Then a third thread is fastened tight to the centre at the pillar; the other end of this straightened thread is moved in such a way that (i) the planet whose azimuth is to be determined and (ii) the intersection of the two threads are in line with the third thread as seen by placing the eye on the outer edge of the middle wall. The azimuth of the planet is given by the degrees on the edge of the outer wall from the east or west point up to the third thread.

On all these instruments in general the graduations are found erased. Some of the instruments are now tilted or broken at places. (SDS)

अथ वृत्तषष्ठांशसंज्ञं यन्त्रमुच्यते

9.11.1. अथ जलसमीकृतायां भूमौ दिक्साधनं कृत्वा याम्योत्तरा भित्तिः पूर्ववत् समकोणसमचतुर्भुजा कार्या । तस्यां दक्षिणतः किञ्चित् प्रदेशं त्यक्त्वा ऊर्ध्वा रेखा कार्या । एवमूर्ध्वपालौ याम्योत्तरा तत्समा रेखा कार्या । तद्योगे केन्द्रं कृत्वा किञ्चिदधिकचतुर्थांशमितं वृत्तं कार्यम् । तद्वृत्तसंलग्नं चतुरङ्गुलपुष्टं चूर्णेष्टकादिना कार्यम् । तत् श्लक्ष्णं कृत्वा तत्रांशाः यथासम्भवं कलाश्चाङ्क्याः । पुनस्तद्भित्तिसमा समानान्तरहस्तद्वयान्तरेण अन्या भित्तिः पूर्वतः कार्या । तत्रापि वृत्तं तथैव विधेयम् । उत्तरतः द्वारं स्थापयित्वा सर्वं भित्त्यन्तरं मुद्रितं कार्यम् । एवं दक्षिणतोऽपि भित्त्यन्तरं मुद्रितं कार्यम् । एवमुपरितनप्रदेशेऽपि पट्टिकादिना मुद्रितः कार्यः । भित्तिद्वयस्य दक्षिणकोणद्वयं ऊर्ध्वाधररेखातः कर्णाकारं छित्वा पट्टिकया पिहितं कार्यम् । छिन्नोभयकोणगतयाम्योत्तररेखायां ऊर्ध्वाधररेखासमीपे सूक्ष्मं सुषिरं कार्यम् । यथा तद्गता रविप्रभा मध्याह्ने वृत्ते पतति तथा कार्यम् ।

अनेन प्रकारेण यन्त्रं कृत्वा तदन्तर्गत्वा कपाटं दत्त्वा मध्याह्ने सुषिरगतां रविप्रभां वृत्ते प्रत्यहं विलोक्य क्रान्त्यक्षयोर्निश्चयः कार्यः । शेषं भित्तियन्त्रवद् ज्ञेयम् । इदं यन्त्रं यथा यथा महद्भवति तथा तथा वेधः भवति । इदमेव यवनैः 'सुद्शफकरी'त्युच्यते ।

(Samrāṭ Jagannātha, *SiSam.*, pp. 7-8)

Aperture gnomon

On ground, made level by means of water, erect a square wall as before, in the direction determined as North-South. On the southern side of it, at some point, a vertical line is drawn, and at its upper end, a North-South line equal to it is drawn. Around their intersection, as centre, a circle is constructed with a width somewhat greater than four inches (*aṃśa*). Make then a circle of plaster adhering to it, exactly four inches (*aṅgula*) in width. This is to be polished, and the degrees and minutes marked on it and numbered. Make another wall parallel to the first and separated from it by two cubits (*hasta*). Make a circle on this in just the same way. At the north end another wall is built to cover these two completely, and the south end is also so covered. The upper part is then covered by boards, etc. At the two southern corners of the two walls cut openings at the vertical line, and cover these with plates. Along the North-South line, where each of these corners is cut, make a fine aperture (in the plate) at the vertical line. When this is done the light of the Sun falls at Noon, as required.

In order to use the instrument, a door giving entry is made. When at noon, the light of the Sun enters the aperture, it is visible each day on the circle, and fixes exactly the declination and the latitude. In other respects this is to be understood like the Wall Instument (*bhittiyantra*). The larger the instrument, the more precise it is. By foreigners (Muslims) this is called Suds al-Fakhri.

(Raymond Mercier, *IJHS* 19 (1984) p. 171).

10. यन्त्राणि – INSTRUMENTS

यन्त्राणि तत्साधनानि च

10. 1. 1. गोलो भगणश्चक्रं धनुर्घटी शङ्कुशकटकर्तर्यः ।
पीठकपालशलाका द्वादशयन्त्राणि सह यष्ट्या ।।

(Lalla, *ŚiDhVṛ.*, 21.53)

Instruments and their accessories

The *Gola*, the *Bhagaṇa*, the *Cakra*, the *Dhanu*, *the Ghaṭī*, the *Śaṅku*, the *Śakaṭa*, the *Kartarī*, the *Pīṭha*, the *Kapāla*, the *Śalākā*, together with the *Yaṣṭi*, are the twelve (astronomical) instruments. (53). (KSS)

10. 1. 2. कर्णश्छाया द्युदलं रविरक्षो लम्बको भ्रमः सलिलम् ।
स्युर्यन्त्रसाधनानि प्रज्ञा च समुद्यमश्चैवम् ।। ५४ ।।

(Lalla, *ŚiDhVṛ.*, 21-54)

The hypotenuse (*karṇa*), the shadow, the semi-duration of the day, (the longitude of) the Sun, the latitude (of the place), the plumb, the compass (or the revolving machine, *bhrama*), water, as well as intelligence and effort are the accessories required in the use of (astronomical) instruments. (54). (KSS)

10. 1. 3. वृत्तं भ्रमत् त्रिचतुरस्रमुपैति कर्णा-
ल्लम्बाच्च सिद्धिमध ऊर्ध्वमिला समाद्भिः ।। २ ।।

(Lalla, *ŚiDhVṛ.*, 21. 2b)

A circle is constructed by means of a compass (or a circular plate is made by means of a revolving machine), and a triangle or quadrilateral by means of hypotenuses (*karṇa*); verticality is achieved by means of a plumb, and the ground is levelled by means of water. (2b). (KSS)

स्वयंभ्रमद् गोलयन्त्रम्

10. 2. 1. काष्ठमयं समवृत्तं समन्ततः समगुरुं लघुं गोलम् ।
पारदतैलजलैस्तं भ्रमयेत् स्वधिया च कालसमम् ।।

(Āryabhaṭa I, *ABh.*, 4.22

Automatically rotating sphere

The Sphere (*Gola-yantra*) which is made of wood, perfectly spherical, uniformly dense all round but light (in weight) should be made to rotate, keeping pace with time, with the help of mercury, oil and water, by the application of one's own intellect. (KSS)

10. 2. 2. भूमौ स्तम्भद्वयं दक्षिणोत्तरं निधाय तयोरुपरि अयःशलाकाग्रे स्थापयेत् । गोलदक्षिणोत्तरच्छिद्रे च तैलेन सिञ्चेत्, यथा निस्सङ्गो गोलो भ्रमति । ततो गोलस्यापरतोऽवटं खात्वा तस्मिन् गोलपरिधिसम्मितदैर्घ्यं साधश्छिद्रं जलपूर्णं नलकं निदध्यात् । गोलस्यापरस्वस्तिके कीलं सन्निधाय तस्मिन् सूत्रस्यैकमग्रं बध्वा अधो विषुवन्मण्डलपृष्ठेन प्राङ्मुखं नीत्वा तत उपर्याकृष्य प्रत्यङ्मुखं तेनैव नीत्वा तदग्रबद्धं पारदपूरितमलाबु जलपूर्णं नलके निदध्यात् ।

ततो नलकस्याधश्छिद्रं विवृतं कुर्यात् । तेन जले निस्रवति नलकस्थजलमधो गच्छति । तद्वशात् तत्रस्थमलाबु पारदपूर्त्या गुरुत्वाद् जलं मुञ्चत् गोलं प्रत्यङ्मुखमाकर्षति । एवं त्रिंशद्घटिकाभिरर्धसम्मितं यथा जलं स्रवति गोलस्य चार्धं भ्रमति, तथा स्वबुद्ध्या जलनिस्रावो योज्यः । एवमपराभिस्त्रिंशद्घटिकाभिः नलकस्थं जलं यथा निश्शेषं स्रवति, अलाबु च नलकस्थले भवति, गोलश्च सकलो भ्रमति तथा च स्वधिया कालसमं गोलं भ्रमयेत् ।

(Sūryadeva-yajvan, Com. on *ABh.*, 4.22:
Edn. KVS, pp. 143-44)

Fix two posts on the ground in the North-South direction and fix on them the two ends of an iron rod (which passes through the centre of an armillary sphere). Apply oil to the holes at the north and south poles of the sphere (through which the iron rod passes) so that the sphere might rotate smoothly. Then, on the ground below the west point of the sphere dig a pit and fix in it a (narrow) cylinder with a (closed) hole at its lower end and as high as the circumference of the sphere. Fill the cylinder with water. Then fix a nail at the west point of the sphere and fasten to it one end of a string. Pass the string downwards along the equator towards the east point. Then stretch it upwards and take it to the west point (again). Then attach to the string a dry hollow gourd filled with mercury and place it on the surface of the water in the cylinder kept filled with water.

Now, open the hole at the bottom of the cylinder. As the water flows out, its level falls. Consequently, the gourd, weighed down as it is by mercury, (also goes down) not leaving (the surface of) the water, and (the string attached to it) pulls the sphere westwards. The outflow of water should be regulated in such a manner that in 30 *ghaṭikās* (12 hours), half the water in the cylinder flows out and the sphere rotates one half. Similarly, in the next 30 *ghaṭikās* the entire water flows out, the gourd reaches the bottom of the cylinder and the sphere completes one full rotation. In this manner, the sphere could be rotated intelligently keeping pace with time. (KVS)

10. 2. 3. इष्टं सुवृत्तवलयं लघुशुष्कदारु
निर्मापितं विविधशिल्पविदाप्ततक्ष्णा ।
गोलं समं सलिलतैलवृषाङ्कबीजैः
कालानुसारिणममुं भ्रमयेत् स्वबुद्ध्या ।। १ ।।

त्रिशत् क्षणं तरति यद्रसतैलकेषु
तत् सार्यते त्रिभिरिदं स्ववहस्य बीजम् ।
(Lalla, *ŚiDhVṛ.*, 21. 1-2a)

The armillary sphere, with radius of one's liking, having perfect circles, made of light and dry timber, by a skilled carpenter who is proficient in the various crafts, should be set to rotate uniformly with time, with the help of water, oil and mercury, by applying one's intellect. (1)

A weight which floats for 30 *kṣaṇas* (=24 hours) in mercury, oil or water, rotates it (i.e., the armillary sphere) with the help of the three (fluids, mercury, oil and water). This is the basic principle of self-rotation.[1] (2a). (KSS)

चक्रयन्त्रम्

10. 3. 1. श्रीपर्णीदारुमयं चक्रं सदरं सुनेमि सन्नाभि ।
अर्धं पारदपूर्णं युक्त्याराणां स्वयं भ्रमति ।। १८ ।।
अक्षोऽस्य ध्रुवयष्टिर्नाभिः श्रोणी भगोलनलिकेव ।
एवंकृतो भगोलः स्वयमेव भ्रमति चक्रवशात् ।। १९ ।।
(Lalla, *ŚiDhVṛ.*, 21. 18-19)

Self-rotating wheel

A 'Wheel', made of the timber of Śrīparṇī (the silk-cotton tree), having a hole in the centre, bearing excellent rim and beautiful nave, and skilfully half-filled with mercury in its (curly) spokes, rotates by itself. (18)

Let the polar axis, which is the same as the axis of rotation of the *Bhagola*, be made the Wheel's axle passing through its nave. This being done, the *Bhagola* rotates automatically due to the rotation of the Wheel. (19). (KSS)

छायायन्त्राणि

10. 4. 1. आर्यभटसिद्धान्तोक्तयन्त्रानुसारेण तत्कृतयन्त्राध्यायश्लोका विलिख्यन्ते । छायायन्त्राणि—

दिङ्मध्यात् सप्तपञ्चाशदङ्गुलैस्त्रिज्यकांशकैः ।
लिखेद् वृत्तं च चक्रांशचिह्नितं सममण्डलम् ।। १ ।।
चराग्रज्याद्युनाडीभिः छायायन्त्राणि साधयेत् ।
समवृत्तविदिक्छायाकर्णाभ्यां क्रान्तिदोर्गुणाः ।। २ ।।

[1] The method may be stated in full as follows:

One should fasten one end of a string to the west cardinal point of the armillary sphere and carry the string round the armillary sphere along the equator (from below). Coming to the west point again, he should tie to it a dry gourd containing mercury and throw it into the cylindrical basin, full of water, kept below the west point, and then open the hole in the bottom of the basin. With the outflow of the water, the gourd goes down and the armillary sphere rotates. In 24 hours the gourd reaches the bottom of the basin and the armillary sphere makes one complete rotation. When necessary, one should apply oil to the ends of the axis of the armillary sphere, so that the axis may rotate smoothly.

The weight of mercury put into the hollow of the dry gourd should be so adjusted that the gourd may float on water and, with its motion downwards, the armillary sphere may rotate.

समवृत्ते स्वदिश्यग्रां दद्यात् प्राच्यपराशयोः ।
चरज्यानामथाग्राङ्कान् दिङ्मध्यात् स्वदिशि न्यसेत् ।।३।।

तदग्रबिन्दुतो वृत्तं वृत्तान्ताग्रं लिखेत्तु तत् ।
स्वाहोरात्रदलं तत्र स्पष्टा नाड्यः स्वशंकुभिः ।। ४ ।।

स्वाहोरात्रदलेंऽशः स्युः षड्गुणा दिननाडिकाः ।
अग्रान्तेऽस्तोदयार्कौ च याम्यार्धे पूर्वपश्चिमे ।। ५ ।।

तत्पूर्वापररेखातो दक्षिणार्धं च तत् स्मृतम् ।
(Āryabhaṭa, *ABh. Siddhānta* Q By Rāmakṛṣṛa Ārādhya in his com. on *SūSi*)

Shadow instruments

According to the astronomical instruments mentioned in the *Siddhānta* of Āryabhaṭa are indicated (below) the verses (34 in number) from the chapter on the astronomical instruments, written by him: (First) the shadow instruments.

Construct a perfect circle (*samamaṇḍalaṁ vṛttaṁ*) with radius equal to 57 *aṅgulas*, being the number of degrees in a radian, and on (the circumference of) it mark the 360 divisions of degrees. (1)

Then construct shadow-instruments (for every day of the year) with the help of the R sine of the Sun's ascensional difference, the R sine of the Sun's *agrā*, and the *nāḍīs* of the duration of the day (in the following manner). (2)

Determine the R sines of the Sun's declination and of the Sun's longitude from the *samavṛttacchāyākarṇa* (i.e., the hypotenuse of the shadow of the gnomon when the Sun is on the prime vertical) or from the *vidik-chāyākarṇa* (i.e., the hypotenuse of the shadow when the Sun is in a mid-direction).

On the perfect circle (drawn above), lay off the (Sun's) *agrā* in its own direction (north or south) in the east as well as in the west (and at each place put down a point). Again lay off the (Sun's) *agrā* corresponding to the Sun's ascensional difference in its own direction from the centre of the circle. (3)

With that end of the (Sun's) *agrā* (as centre), draw a circle passing through the (two) points marked on the circle: this circle denotes the Sun's diurnal circle. On (the southern half of) that circle, put down marks indicating true *ghaṭīs* with the help of the corresponding positions of the gnomon. (4)

These *ghaṭīs* of the day, multiplied by six, are the degrees on the diurnal circle. At the two points marked at the ends of the Sun's *agrā* in the east and the west, are the positions of the Sun at rising and setting. (5)

[1] In each position the gnomon is to be held in such a way that the end of the shadow may lie at the centre of the circle.

Half of the diurnal circle lying towards the south of the rising-setting line (of the Sun) is called the southern half of the diurnal circle. (6a).[1] (KSS)

तोययन्त्राणि

10. 5. 1. स्तम्भं सद्बिलसम्पूर्णं तोयं रन्ध्रे तु योजयेत् ।
तन्मुक्तकालसम्भाज्यः स्तम्भायामोऽङ्गुलात्मकम् ।।१८।।
अङ्गुलानां मितिः स्तम्भे प्रतिनाडीं तु यन्त्रके ।
नाड्याख्याद् भूतलच्छिद्रात् पूर्यादम्बुघटीतलम् ।। १९ ।।
बीजमेतत् घटीमानं यन्त्रेषु स्तम्भसूत्रयोः ।
यन्त्रे बद्धनरे शिल्पे युद्धे मेषादिकेऽपि च ।। २० ।।
अन्तःसुषिरमेवं तन्मयूरं वानरं तथा ।
स्थाप्य स्तम्भे तु सम्पूर्णे यन्त्रे षष्ट्यङ्गुलोच्छ्रिते ।।२१।।
सुश्लक्ष्णकीलकं सूक्ष्मं यन्त्राङ्कपरिकल्पितम् ।
षष्ट्यङ्गुलेन सूत्रेण वेष्टयेत् षष्टिवेष्टनैः ।। २२ ।।
तं प्रक्षिपेन्नरे मूर्ध्नि निर्गच्छन् कर्णरन्ध्रयोः ।
पार्श्वयोर्निक्षिपेत् सूत्रं मयूरे वानरेऽपि वा ।। २३ ।।
मध्यवेष्टितसूत्राग्रे बध्वाऽलाबुं सपारदाम् ।
नरोपरि जले क्षिप्त्वा गुदच्छिद्रेऽम्बु मोचयेत् ।। २४ ।।
मयूरे वानरे वेत्थं बध्वाऽलाबु सपारदाम् ।
नाभिरन्ध्रादधः स्तम्भजले क्षिप्त्वाऽम्बु मोचयेत् ।। २५ ।।
प्रतिनाडीं जलं छिद्रान्निर्गच्छत्येकमङ्गुलम् ।
स्तम्भेऽलाबुर्बिलान्तस्याऽधो याति तथांऽगुलम् ।। २६ ।।
तद्यन्त्रमध्यकीलस्थवेष्टनं चैकमङ्गुलम् ।
अलाबुकर्षणे सूत्रं अधो याति बिलोन्मुखम् ।। २७ ।।
तत्कीलाग्रेऽपरं सूत्रं नाडीज्ञानाय लम्बयेत् ।
तद्वेष्टनानि यावन्ति तावन्त्यो घटिका गताः ।। २८ ।।
(Āryabhaṭa I, *ABh.Siddhānta*, Q by Rāmakṛṣṇa Ārādhya in his com. on *SūSi.*)

Water instruments

Construct a pillar with an excellent (cylindrical) cavity inside. Fill up the cavity with water (and then open the hole at the bottom of the pillar so that water may flow out). By the time (in *ghaṭis*) taken by the water to flow out completely, divide the whole length of the pillar. From this can (be calculated) the measure of an *aṅgula* (which corresponds to a *ghaṭi*). (18)

On the pillar, mark the *aṅgulas* corresponding to each *ghaṭi*. The water corresponding to one *ghaṭī* flowing out from the hole (at the bottom of the pillar) in the level of the ground, completely fills a *ghaṭikā* vessel (in one *ghaṭi*). (19)

This measure of *ghaṭī* is the basis (*bīja*) (for the determination) of (the height of) the pillar and of (the length of) the cord to be used in connection with the (time-)instruments. Having tied around the pillar a man or a pair of fighting rams of craftsmanship (keeping the head of a figure just above the top of the pillar), or having surmounted the pillar by the figures of a peacock or a monkey, bearing a cavity inside it, thus making the whole instrument sixty *aṅgulas* in height, take a smooth fine (cylindrical) needle with its periphery equal to a unit of graduation (i.e. one *aṅgula*) on the instrument, and on it wrap a cord of sixty *aṅgulas* in sixty coils. (20-22)

Place this needle within the head of 'man' passing it through the holes of the ears, or, in the case of peacock or monkey, support the needle (over the holes) on the two sides (of the body). (23)

Having tied a gourd containing (an appropriate quantity of) mercury to the end of the cord wrapped around the needle, place it on the water (inside the pillar, through the hole) at the top of the man, and then let the water flow out through the hole at the anus. (24)

Similarly, in the case of the peacock or the monkey, tying a gourd containing mercury (as before), throw it on the water of the pillar through the navel hole and release the flow of water. (25)

An *aṅgula* of water now flows out in a *nāḍī*, as also the gourd within the pillar goes down by an *aṅgula*. The cord wrapped around the needle, within the instrument, also goes down towards the hole underneath due to the pull of the gourd. (26-27)

At one extremity of the needle, protruding outside the instrument, suspend another cord to know the *nāḍīs* elapsed. The number of coils made by this cord on the needle will indicate the *nāḍīs* elapsed. (28). (KSS)

10. 5. 2. जलकुण्डेऽधश्छिद्रे घटिकाकालाङ्किते जलस्रुत्या ।
गोले वेष्टनसूत्राग्रबद्धतुम्बं क्षिपेत् सरसम् ।। १० ।।
स्रवति च यथा यथाम्भस्तथा तथालाबु गच्छमानमधः ।
भ्रमयति गोलकमम्भो मुक्ताङ्का नाडिका याताः ।।११।।
(Lalla, *ŚiDhVṛ.*, 21. 10-11)

(One should fasten one end of a string to the west cardinal point and carry it round the *Bhagola* along the equator from below). Where the string completes one round of the *Bhagola*, tie to it a (dry hollow) gourd containing mercury and throw it into the (cylindrical) basin of water (kept below the west point), having a hole in

[1] The *Chāyā-yantra* thus constructed, was used for determining the *ghaṭi-s* and degrees elapsed (since sunrise) at any time of the day. For this purpose, one had to find the point where the instantaneous shadow of the gnomon crossed the dirunal circle and to read the graduations between that point and the initial point of the Sun's *agrā*. One *Chāyā-yantra* served the purpose of giving time for one day only. Hence, 365 such instruments were constructed, one for each day of the year. Shadow-instruments of the type described above are unusual, as they are not found to occur in any other work on Indian astronomy.



Maharaja Sawai Jai Singh's Observatory, Jaipur: A view

1. Rāma-yantra
2. Declination instruments
3. Jayaprakāśa-yantra
4. Rāśi-yantra complex



Maharaja Sawai Jai Singh's Observatory, Delhi: Miśra-yantra

प्रणिपत्यैकमनेकं सत्यां देवतां परं ब्रह्म ॥ आर्यभटस्त्रीणि गदति
गणितं कालक्रियां तथा गोलं ॥१॥ वर्गाक्षराणि वर्गेऽवर्गे
वर्गाक्षराणि कात् ङ्मौ यः ॥ खद्विनवके स्वरा नव वर्गेऽवर्गे
नवान्त्यवर्गे वा ॥२॥ युगरविभगणाः ख्युघृ ४३२००००
शशि चयगियिङुशुछ्लृ ५७७५३३३६ कु ङिशिबुण्लृ
१५८२२३७५०० प्राक् ॥ शनि ढुङ्विघ्व १४६५६४ गुरु
खिच्युभ ३६४२२४ कुज भद्लिझ्नुखृ २२९६८२४ भृगु
बुधसौराः ॥३॥ चन्द्रोच्चर्जु ध ४८८२१९ बुधथृष्ठगु
शिन १७९३७०२० भृगु जषबिखुछृ ७०२२३८८ शे
षार्काः ॥ बुफिनच २३२२२६ पातविलोमाबुधाह्न्यजार्को
दयाच्च लङ्कायां ॥४॥ काहो मनवो ढ १४ मनुयुगस्ख ७२
गतास्ते च ६ मनुयुगछ्ना २७ च ॥ कल्पादेर्युगपादा ग ३
च गुरुदिवसाच्च भारतात्पूर्वं ॥५॥ शशिराशय ठ १२
चक्रं तेंऽशकला योजनानि य ३० व ६० ञ १० गुणाः ॥ प्राणे
नैति कलां भं खयुगांशे ग्रहजवो भवांशोऽर्कः ॥६॥ नृषि
८० योजनं ञिला १०५० भूव्यासोऽर्केन्द्वोर्घ्रिञ ४४१० गि
ण ३१५ कं १ मेरोः ॥ भृगु गुरु बुध शनि भौमाः शशि ङ ५
ञ १० ण १५ न २० मां २५ शकाः समार्कसमा ४३२००००
॥७॥ भा २४ परमा ग्रहांशाः शशिविक्षेपोपमण्डलाझ्नार्द्धे ४ ॥
शनिगुरुकुज ख २ क १ गार्द्धे ॥ भृगुबुध ख २ स्वा
ला य ४ हस्ताना ॥८॥ बुधभृगुकुजगुरुशनिन २० व
र ४० पा ८० ह १०० गत्वांशकान्प्रथमपाताः ॥ सवितुर्मी
षां च तथा द्वा ७८ श्रखि २१० सा ९० ह्वा ३३० ल्ध
खिच्य २७० मन्दोच्चं ॥९॥ झार्द्धानि मन्दवृत्तं शशि न छ
७ ग ३ घ ४ द १४ छ ७ झ ९ यथोक्तक्षयः ॥ झ ९ ग्ड ल
५३ झ ५१ ढु ३१ तथा शनिगुरुकुजभृगुबुधोच्च शैघ्र्य
ण्यः ॥१०॥ मन्दात् ङ ५ ख २ द १८ ञ ८ डा २० वक्रिणां

Āryabhaṭīya of Aryabhaṭa I
Facsimile of page 1 from Bombay University ms.



Sūryasiddhānta

Facsimile of page 1 from Bombay University ms.



Siddhāntaśiromani of Bhāskara II

Facsimile of a page from Bombay University ms.



Aryabhatīya-bhāṣya of Govindasvāmin
Facsimile of two pages from palmleaf ms. with K.V. Sarma



Laghumānasa of Muñjāla with the commentary of Sūryadevayajvan
Facsimile of palmleaf ms. with K.V. Sarma

the bottom and graduated with the marks of *ghaṭīs* on the basis of the outflow of water. (10)

As the water flows out (through the hole in the bottom of the basin), the gourd, going downwards, rotates the *Bhagola*; and the *nāḍī* marks left behind by the water denote the *ghaṭīs* elapsed. (11). (KSS)

नरयन्त्रम्

10. 5. 3. घटिकाङ्गुलसङ्ख्यां बुध्वा चीर्यां निवेशयेद् घटिकाः ।
तदनेन ता निरुद्ध्यादुदरेण नतवदनमनुजस्य ॥ १२ ॥
चीर्येत बद्धसूत्रे तिर्यक्स्थितवदनकीलकनलेन ।
नीत्वा जठरच्छिद्रेण केनचिद् तद् बहिः कुर्यात् ॥ १३ ॥
तत्र निबद्धमलाबु प्राग्वत् सलिलेन नीयमानमधः ।
चीरीमाकृष्यान्यां जपत्यमुं नाडिकां गुटिकाम् ॥ १४ ॥

Nara-yantra

Knowing the number of *aṅgulas* corresponding to one *ghaṭī* (from the fall in water level as a result of the outflow of water in one *ghaṭī*) insert *ghaṭikā* beads at that distance in a strip of cloth and keep them in position by applying wax (or any other adhesive) and throw it inside the body of a human figure with face bent down. (12)

To one end of the cloth-strip tie a string and carry it round a rod fitted horizontally within the mouth of the man, and take it out through a certain hole in the belly of the man. (13)

Tie to it a dry gourd (containing mercury) (and throw it into the basin of water kept underneath, as before). As the gourd goes down, the man, pulling the cloth-strip, releases a new *nāḍī* bead after the lapse of every *ghaṭī*. (14). (KSS)

कूर्ममेषमयूरादियन्त्राणि

10. 5 4. कूर्मादयश्चैवं घटिकां जह्नुर्यथेष्टकालेन ।
मेषादीनां युद्धं सूत्रे सक्ते भवेदुभयोः ॥ १५ ॥
परिकल्पितकालाध्वनि युक्त्या योगो भवेद्वधूवरयोः ।
घटिकाङ्गुलाङ्कितं वा ग्रसति मयूरः क्रमादुरगम् ॥१६॥
हन्ति मनुष्यः पटहं छादयति छादकस्तथा छाद्यम् ।
एवंविधानि यन्त्राण्येवमनेकानि सिद्धयन्ति ॥ १७ ॥
(Lalla, *ŚiDhVṛ.*, 21. 12-17)

Kūrma-Meṣa-Mayūra-yantra

The tortoise etc. also, in the same manner, can be made to release the *ghaṭikā*-(beads) at the desired intervals of time. Similarly, there occurs a fight between two rams (after every *ghaṭī*), when they are connected by the string (carrying beads). (15)

By the proper coordination of time and distance, there occurs a union of husband and wife (after every *ghaṭī*), a peacock gradually devours a 'serpent' marked with the divisions of *aṅgulas* denoting *ghaṭīs*, a 'man' beats a drum (after every *ghaṭī*), and an 'eclipser' eclipses the body to be eclipsed (after the lapse of every *ghaṭī*). Several other (time-measuring) instruments like these may be (designed and) constructed. (16-17). (KSS)

कपालयन्त्रम्

10. 5. 5. स्वेष्टं वाऽन्यदहोरात्रे षष्ट्याऽम्भसि निमज्जति ।
ताम्रपात्रमधश्छिद्रमम्बुयन्त्रं कपालकम् ॥ ३१ ॥
(Āryabhaṭa I, *ABh.Siddhānta*, Q by Rāmakṛṣṇa Ārādhya in his com. on *SūSi.*)

Kapāla-yantra

Any copper vessel made according to one's liking with a hole in the bottom, which sinks into water 60 times in a day and night, is the water instrument called *Kapāla*. (31). (KSS)

चक्रयन्त्रम्

10. 6. 1. वृत्तं कृत्वा फलकं षड्वर्गाङ्कं तथा च षष्टयङ्कम् ।
मध्यस्थितावलम्बं मध्यस्थित्या प्रविष्टोष्णम् ॥ २० ॥
तदधोलम्बविमुक्तं गृहादि यत्तदुदितं दिनकरांशात् ।
नाड्यः पूर्वकपाले द्युगतास्ताः पश्चिमे द्युदलात् ॥ २१ ॥
(Lalla, *ŚiDhVṛ.*, 21. 20-21)

Cakra-yantra (Circle instrument)

Take a circular board, graduate it with the 360 divisions (of degrees) as well as the 60 divisions (of *ghaṭīs*), fix a vertical needle at its centre and set it up in such a way in that the Sun may lie centrally in its plane. (20)

Then the Signs etc. left behind (since sunrise) by the shadow of the vertical needle denote the Signs etc. by which the Sun has ascended (above the horizon). The *nāḍīs* left behind denote the *nāḍīs* elapsed since sunrise, provided the Sun is in the eastern hemisphere. When the Sun is in the western hemisphere, the *nāḍīs* thus obtained should be subtracted from half the duration of the day (to get the *nāḍīs* to elapse before sunset).[1] (21). (KSS)

[1] This rule is true for places on the equator only. At other places, it will give the Sun's altitude and the *ghaṭīs* corresponding to it. There are reasons to believe that observation was made at a place away from the equator, since sunrise was deduced from the Sun's altitude by applying the following formula:

$$\textit{nāḍīs}\text{ elapsed} = \frac{\text{semi-duration of day} \times \text{Sun's altitude}}{\text{Sun's meridian altitude}}$$

Brahmagupta has criticised the astronomers who used this formula. See *Br SpSi*, 22.11.

धनुर्यन्त्रम्

10. 7. 1. चक्राख्यं यन्त्रमिदं दलं धनुर्यन्त्रमाहुरस्यैव ।
ज्याकार्मुकभूच्छिद्रप्रविष्टदिनकरकरं धार्यम् ॥ २२ ॥
मध्यस्थलम्बमुक्ताः कोटेरारभ्य नाडिका द्युगताः ।
उदिताश्च दिनकरांशादारभ्य भवन्ति गृहभागाः ॥२३॥
(Lalla, *SiDhVṛ.*, 21. 22-23)

Dhanur-yantra (Semi-circle instrument)

What has been described above is the *Cakra-yantra*, half of which is called *Dhanuryantra* ('Semi-circle'). This latter instrument should be held (with its chord horizontal) in such a way that a ray of the Sun passing through the hole in the middle of the chord may fall on the arc. (22)

Then the *nāḍīs* left behind by the shadow of the central needle, as measured from the arc-end, denote the *nāḍīs* elapsed during the day (since sunrise), and the signs and degrees left behind denote the signs and degrees by which the Sun has (ascended above the horizon). (23). (KSS)

10. 7. 2. वृत्तव्यासो धनुर्ज्या स्याद् व्यासार्धं धनुषः शरः ॥ ६ ॥
शङ्कुच्छाया धनुर्ज्यायां दिङमध्यात्त्विष्टभा सदा ।
प्रागग्रं धनुषो वृत्ते भ्रामयेदर्कदिङमुखम् ॥ ७ ॥
चापाग्रोदयमध्यांशाः षड्भिर्भाज्या दिने गताः ।
(Āryabhaṭa I, *ABh.Siddhānta*, Q by Rāmakṛṣṇa in his com. on *SūSi.*)

The chord of the *Dhanuryantra* is equal to the diameter of the circle (i.e., the perfect circle), and its arrow is equal to the radius. It is mounted on the circle vertically with the two ends of its arc coinciding with the east and west points. (6 b)

[1] For the rationale of the several processes involved see *KR:KSS*, pp. 76-79.

क्रान्तिज्यादयः

17. 4. 2. शुभ्रभानुभुजशिञ्जिनी हृता 'कृष्णवर्त्मकुमुदाकरप्रियैः' ।
भाजिता 'नयनपावकै'र्भवेत् क्रान्तिमौर्व्यशिशिरद्युतेरपि ॥

चन्द्रस्य दिनमानम्

शश्यपक्रमधनुः समान्यदिक्क्षेपयुक्तवियुतं स्फुटं भवेत् ।
शिञ्जिनी च तत इन्द्वपक्रमज्या स्फुटान्यदत उक्तकर्मणा ॥

चन्द्रस्य चरार्धम्

आयनेतरजदृक्फलोनयुग् भिन्नतुल्यशरचन्द्रगोलयोः ।
वक्ष्यमाणचरखण्डसाधितं स्याच्चरार्धमथवैन्दवं स्फुटम् ॥ ३

चन्द्रशङ्कुः

अर्कवत् स्वदिनयातयेययोः शङ्कुरस्य धनुषोऽर्कपूर्ववत् ।
सिद्धदृग्गतिकलोनितस्य या ज्या स्फुटः स खलु शङ्कुरैन्दवः॥

(Lalla, *ŚiDhVṛ.*, 9. 1-4)

R sine declination of the Moon

The R sine of the longitude of the Moon multiplied by 13 and divided by 32 gives the R sine of the declination of the Moon's (position on the ecliptic) or its *madhyamakrāntijyā*. (1)

Measure of the Moon's day

The sum or difference of the Moon's *madhyamakrānti* and its latitude, according as they are in the same or opposite directions, gives the Moon's *sphuṭakrānti* or the declination of the Moon's centre. Find its R sine. The result is the correct R sine declination. Hence find (the half variation of the Moon's day) following the methods given before. (2)

Half variation of the Moon's day

Or, calculate the Moon's half variation of the day (from the *madhyamakrānti* or the declination of its position on the ecliptic) using the tabular differences to be given later on. Then add to it or subtract from it the Moon's second visibility correction, according as the Moon and its latitude are in the same or different spheres. The result is the correct half variation of the Moon's day. (3)

R sine altitude of the Moon

As in the case of the Sun, calculate the R sine altitude of the Moon for the time passed or to pass in the day of the Moon. Then find the arc corresponding to this as the R sine. Subtract from it the longitudinal parallax in minutes of the Moon as calculated before. Find the R sine of the remainder. The result is the correct R sine altitude of the Moon. (4). (BC)

दृक्कर्म

—१. आक्षदृक्कर्म

17. 5. 1. विक्षेपगुणाक्षज्या लम्बकभक्ता भवेद् ऋणमुदक्स्थे ।
उदये धनमस्तमये दक्षिणगे धनमृणं चन्द्रे ॥ ३५ ॥

(Āryabhaṭa I, *ABh.*, 4. 35)

Visibility corrections

—1. Ākṣadṛkkarma

Multiply the R sine of the latitude of the local place by the Moon's latitude and divide (the resulting product) by the R sine of the colatitude: (the result is the *ākṣadṛkkarma* for the Moon). When the Moon is to the north (of the ecliptic), it should be substracted from the Moon's longitude in the case of the rising of the Moon and added to the Moon's longitude in the case of the setting of the Moon; when the Moon is to the south (of the ecliptic), it should be added to the Moon's longitude (in the case of the rising of the Moon) and subtracted from the Moon's longitude (in the case of the setting of the Moon). (35)

17. 5. 2. विक्षेपज्यां क्षपाभर्तुरक्षज्याक्षुण्णविग्रहाम् ।
लम्बकेन हरेल्लब्धं विशोध्यं तत्स्फुटेन्दुत: ।। १ ।।

उदये सौम्यविक्षेपे देयमस्तमये सदा ।
व्यस्तं तद्याम्यविक्षेपे कार्यं स्यादुदयास्तयो: ।। २ ।।

(Bhāskara I, *LBh.*, 6. 1-2)

Multiply the R sine of the Moon's latitude by the R sine of the (local) latitude and divide (the product) by the R sine of the colatitude. Whatever is thus obtained should be subtracted from the Moon's longitude in the case of the rising of the Moon (i.e., in the eastern hemisphere) and added to that in the case of the setting of the Moon (i.e., in the western hemisphere), provided that the Moon's latitude is north. When the Moon's latitude is south, the above correction is applied reversely in the cases of rising and setting (both). (1-2). (KSS)

17. 5. 3. विषुवच्छायागुणितो विक्षेपो रविहृत: शशिन्युदये ।
उत्तरतो विश्लेषो याम्ये योज्योऽस्तगे व्यस्तम् ।। २ ।।

(Deva, *KR*, 5.2)

Multiply the Moon's latitude by the equinoctial midday shadow and divide (the product obtained) by 12; (the result is the *ākṣa-dṛkkarma* for the Moon). In the case of moonrise, subtract it from or add it to the Moon's longitude according as the Moon's latitude is north or south. In the case of moonset, the law of addition and subtraction is just the reverse.[1] (2). (KSS)

आयनदृक्कर्म

17. 5. 4. विक्षेपापक्रमगुणमुत्क्रमणं विस्तरार्धकृतिभक्तम् ।
उदगृणधनमुदगयने दक्षिणगे धनमृणं याम्ये ।। ३६ ।।

(Āryabhaṭa I, *ABh.*, 4. 36)

ii. Āyanadṛkkarma

Multiply the R versed sine of the Moon's (tropical) longitude (as increased by three signs) by the Moon's latitude and also by the (R sine of the Sun's) greatest declination and divide (the resulting product) the by square of the radius. When the Moon's latitude is north, it should be subtracted from or added to the Moon's longitude, according as the Moon's *ayana* is north or south (*i.e.* according as the Moon is in the six signs beginning with the tropical sign Capricorn or in those beginning with the tropical sign Cancer); when the Moon's latitude is south, it should be added or subtracted, (respectively). (36). (KSS)

17. 5. 5. त्रिराश्यूनोत्क्रमक्षुण्णां तत्कालक्षिप्तिमाहताम् ।
क्रान्त्या परमया भूयो हरेद् व्यासदलस्य ताम् ।। ३ ।।

कृत्या लब्धकला: शोध्या विक्षेपायनयोर्दिशो: ।
तुल्ययोर्व्यत्यये क्षेप्यं शीतांशोस्तत्फलं सदा ।। ४ ।।

(Bhāskara I, *LBh.*, 6. 3-4)

Multiply the (Moon's) instantaneous latitude by the R versed sine (of the Moon's longitude) as diminished by three Signs and then by the R sine of the (Sun's) greatest declination and divide that (product) by the square of the radius. The resulting minutes of arc should be subtracted from the longitude of the Moon when the latitude and *ayana* (of the Moon)[1] are of like directions. In the contrary case, they should always be added to the longitude of the Moon. (3 4). (KSS)

17. 5. 6. एवं कर्मक्रमात् सिद्धो दृश्यतेऽन्तरित: शशी ।
भागैर्द्वादशभि: सूर्याद् व्यभ्रे नभसि निर्मले ।। ५ ।।

(Bhāskara I, *LBh.*, 6. 3-5)

When the Moon obtained by applying these (two visibility) corrections is found to be twelve degrees (of time) distant from the Sun, she shall be (just) visible in clear cloudless sky. (5). (KSS)

17. 5. 7. विक्षेपो राशित्रययुतशशिजीवाहतोऽ'द्रिगुणशैलै:' ।
लब्धो विक्षेपायनसमदिशि शोध्योऽन्यत्र विक्षेप: ।। ३ ।।

(Deva, *KR*, 5.3)

Multiply the Moon's latitude by the R sine of the Moon's longitude as increased by 3 signs and divide by 737: the result (which is known as the *āyana-dṛkkarma*) should be subtracted from the longitude of the Moon, if the Moon's latitude and *ayana* are of like directions. In the contrary case, it should be added.[2] (3). (KSS)

---

[1] That is:

$$\text{Moon's } \bar{a}k\d{s}a\text{-}d\d{r}kkarma = \frac{\text{Moon's latitude} \times \text{equinoctial midday shadow}}{12}$$

[1] The Moon's *āyana* is north or south according as the Moon is in the half-orbit beginning with the tropical (*sāyana*) sign Capricorn or in that beginning with the tropical (*sāyana*) sign Cancer.

[2] For the rationale, see *KR: KSS*, p. 73.

—३. तृतीयं कर्म

17.5.8. 'मङ्गलवेदा'श्च कला प्राक्पश्चाद्भागयोः ऋणधनं स्यात् ।
एभिस्त्रिभिर्विधानैः दर्शनयोग्यो भवति चन्द्रः ॥ ४ ॥

(Deva, *KR*, 5.4)

iii. The Third correction

48 minutes too should be subtracted from the Moon's longitude or added to that according as the Moon is in the eastern or western hemisphere. By applying these three corrections, the Moon becomes fit for observation (at sunset).[1] (4). (KSS)

चन्द्रोदयास्तमयकालः

17.6.1. सूर्यश्चक्रार्धयुतः तदा विलग्नं यदीन्दुरूनोऽस्मात् ।
पूर्वमुदेत्यधिकश्चेत् पश्चात् दिवसाधिपास्तमयात् ॥ ५ ॥

राश्युदयैरानीयात् तत्कालं चन्द्रलग्नतः प्राग्वत् ।
रात्रौ तु नाडिकाः स्युः क्षेप्यास्त्याज्या दिवाऽभ्युदितैः ॥६॥

(Deva, *KR*, 5.5-6)

Rising and setting of the Moon

Increase the longitude of the Sun for sunset by 6 Signs: the result is the longitude of the horizon-ecliptic point in the east. If the longitude of the Moon (for sunset) is less than that, the Moon rises before sunset; if greater, after sunset. (5). (KSS)

The time of moonrise should be obtained from the Moon's longitude, the longitude of the rising point of the ecliptic, and the oblique ascensions of the Signs, as before. When moonrise occurs in the night (i.e., after sunset) the *nāḍīs* (intervening between the Moon and the rising point of the ecliptic) should be added to the measure of the day; when moonrise occurs in the day (i.e., before sunset) the *nāḍīs* (intervening between the Moon and the setting point of the ecliptic) should be subtracted from the measure of the day: (the result in either case is the time of moonrise reckoned since sunrise). (6). (KSS)

17.6.2. याम्योदग्विक्षेपाद् विषुवद्भाघ्नाद् रविभिरवाप्तांशः ।
उदये शशिनो वृद्धिः क्षयो विपर्यस्तमस्तमये ॥ ८ ॥

एवं व्यर्काच्चन्द्राद् यद्यूना राशयः षडधिका वा ।
तदुदयकालेन दिवा निशि च शशाङ्कोदयो वाच्यः ॥ ९ ॥

कृत्वैवं क्षयवृद्धी व्यार्काच्चन्द्राद् विशोध्य चक्रार्धम् ।
शेषोदयकालसमे शशिदिवसान्ते शशी मध्ये ॥ १० ॥

(Varāha, *PS*, 5.8-10)

Multiply the Moon's latitude in degrees by the equinoctial shadow and divide by twelve. Add the

[1] This correction is probably meant to account for the difference between the horizontal parallaxes of the Moon and the Sun. 48′ is evidently the difference between the horizontal parallaxes of the Moon and the Sun. For, according to Āryabhaṭa I:
Moon's horizontal parallax = 52′ 30″
Sun's horizontal parallax = 3′ 56″

resulting degrees to the longitude of the Moon, or subtract from it, according as the Moon's latitude is south or north, if the times of daily moonrise is to be computed. If the times of daily moonset is to be found, reverse the addition and subtraction, (*i.e.* subtract and add respectively). (8)

Subtract the longitude of the Sun from that of the Moon corrected thus. Find the time for this segment of the ecliptic to rise, after sunrise. By so much time after sunrise, the Moon will rise. If this segment is less than six *rāśis*, then the moonrise will fall in the daytime, if greater, the Moon will rise at night. (9)

In the manner given in verse 8, correct the Moon for moonset, deduct the Sun from this corrected Moon, and deduct 6 *rāśis* from the remainder. Find the time by which the remaining segment will rise, after sunrise. This is the time from sunrise when the Moon will set. At the time exactly midway between moonrise and moonset, the Moon will reach the meridian, *i.e.*, will be at upper culmination).[1] (10). (TSK)

चन्द्रोदयास्तमयस्फुटकालः

17.6.3. भवनषट्कयुतेन विवस्वता
भवति चेत् सदृशो हिमदीधितिः ।
सममुदेति तथास्तमुपेयुषा
निशि महानमहानपि वासरे ॥ ९ ॥

शशधरो गृहषट्कसमन्वितो
यदि समो रविणोदयमेष्यता ।
युगपदस्तमुपैति महान् दिवा
निशि लघुः समयोऽत्र च पूर्ववत् ॥ १० ॥

अह्नो निशश्च घटिकाभिरितागताभिः
सङ्गुण्य भुक्तिमुडुपस्य 'खषड्'विभक्ताम् ।
कृत्वा क्रमाद्धनमृणं द्युनिशान्तजस्य
दृक्कर्म चापि समयोऽसकृदेव साध्यः ॥ ११ ॥

ऊनो विलग्नादधिकोऽस्तलग्नाद्
दृश्यः शशी स्यात् कृतदृष्टिकर्मा ।
यथान्तरेऽर्कग्रहयोस्तथानयोः
प्रसाध्यते यः समयः समुन्नतः ॥ १२ ॥

(Lalla, *ŚiDhVṛ.*, 8. 9-12)

Corrected time for the rising and setting of the Moon

If the true longitude of the Moon, (corrected by the two visibility corrections), is the same as the true longitude of the Sun at sunset, increased by 6 Signs, the Moon rises at the same time as the Sun sets; if greater, it rises after, and if less, it rises before sunset. (9)

[1] For the working, see *PS: TSK*, 5. 8-10.

If the true longitude of the Moon (corrected by the two visibility corrections) and increased by 6 Signs is the same as the true longitude of the Sun while rising, the Moon sets at that time; if greater, it sets after and if less, before sunrise. The times (for these phenomena) should be calculated as before. (10)

Multiply the daily motion of the Moon by the number of hours elapsed or to elapse, as (calculated above), either in the days or in the night, and divide the produt by 60. The quotient should be added to or subtracted from the true longitude of the Moon, either at the end of the day or at the end of the night (as the case may be). Then again, the longitude of the Moon corrected by the two visibility corrections should be calculated and hence the time. The process must be repeated till the time is fixed. (11)

If the true longitude of the Moon, corrected by the two visibility corrections, is less than the *udayalagna* or the longitude of the rising point of the ecliptic and greater than the *astalagna* or the longitude of the setting point of the ecliptic, the Moon is visible.

The time passed since the Moon was on the eastern horizon and to pass when it will be on the western horizon, can be found from the longitudes of these points and of the Moon; and so also in the case of a planet.[1] (12). (BC)

चन्द्रच्छाया

17. 7. 1. खद्युखण्डसदृशो यदोन्नतः स्यात् तदा गगनमध्यगः शशी ।
तत्र चोक्तवदहर्दलप्रभा चन्द्रवच्च भनभःसदामपि ।। ५ ।।
(Lalla, *SiDhVṛ.*, 9.5)

Moon's shadow

When the time equal to half the day of the Moon has passed since its rising, then it is midday. Find the shadow of the gnomon caused by the Moon for that time as explained before (in the case of the Sun). In the same manner, the shadows caused by the stars and planets must be found. (5).[2] (BC)

17. 7. 2. ताभिः शशिनश्च्छाया 'षड्गुणिते'तिक्रमेण बोद्धव्याः ।
पञ्चप्रश्नविधानं सूर्यवदत्रापि सञ्चिन्त्यम् ।। ७ ।।
(Deva, *KR*, 5.7)

From those *nāḍīs* (intervening between the Moon and the rising or setting point of the ecliptic), one may obtain the gnomonic shadow due to moonlight by applying the rule: "Multiply the given *vināḍīs* by 6, etc." (*vide supra*, ch. iv. vss. 8-9). Methods for solving the five problems (*vide supra*, ch. iv. of vss. 16-17) should also be contemplated here (in the case of the Moon) too as in the case of the Sun. (7). (KSS)

[1] For elucidation and demonstration see, *ŚiDhVṛ:BC*, II. 159-61.

[2] For detailed elucidation see *ŚiDhVṛ:BC*, II. 162-66.

17. 7. 3. उदयेन्द्वन्तरप्राणैरस्तचन्द्रान्तरैरपि ।
स्वाहोरात्रादिभिश्चान्द्रैः शङ्कुदृग्ज्ये ततः प्रभा ।। २२ ।।
(Bhāskara I, *LBh.*, 6. 22)

From the *asus* (of the oblique ascension of the portion, the ecliptic) lying between the rising point of the ecliptic and the Moon (corrected for the visibility corrections) or from those (taken in setting at the local place by the portion of the ecliptic) lying between the setting point of the ecliptic and the Moon (corrected for the visibility corrections) (according as the Moon is above the eastern or western horizon), and from the Moon's day radius, etc., determine (the R sine of) the (Moon's) altitude and zenith distance and therefrom the shadow of the gnomon (due to the Moon). (22). (KSS)

ग्रहस्य दृश्यादृश्यत्वम्

17. 7. 4. निशीष्टलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः ।
दिनेऽपि चन्द्रे रविसन्निधानान्नास्तं गतश्चेत् सति दर्शने भा ।।

ग्रहस्य द्युगतम्

ज्ञातुं यदा भाभिमता ग्रहस्य तत्कालखेटोदयलग्नलग्ने ।
साध्ये तयोरन्तरनाडिका यास्ताः सावनाः स्युर्द्युगता ग्रहस्य।।

ता एव खेटद्युतिसाधनार्थं
क्षेत्रात्मकत्वात् सुधिया नियोज्याः ।
ऊनस्य भोग्योऽधिकभुक्तयुक्तो
मध्योदयाढ्योऽन्तरकाल एवम् ।। १२ ।।

स्पष्टा क्रान्तिः स्फुटशरयुतोनैकभिन्नाशभावे
तज्ज्या स्पष्टोऽपमगुण इतो द्युज्यकाद्यं ग्रहस्य ।
कृत्वा साध्या तदुदितघटीभिः प्रभा भानुभाव-
च्चन्द्रादीनां नलकसुषिरे दर्शनायापि भानाम् ।। १३ ।।

स्वभुक्तितिथ्यंशविवर्जितो ना
महांल्लघुः 'खाग्निकृतां'शहीनः ।

स्फुटक्रान्तिः

स्पष्टो भवेदस्फुटजातदृग्ज्या
सन्ताडितार्कैः स्फुटशङ्कुभक्ता ।। १४ ।।

प्रभा भवेन्ना तिथिभागतोऽल्पो
यावद्विधुस्तावदसावदृश्यः ।
एवं किल स्यादितरग्रहाणां
स्वल्पान्तरत्वान्न कृतं तदाद्यैः ।। १५ ।।
(Bhāskara II, *SiŚi.*, 1. 7.10-15)

Visibility of the planet

During the night, if, at a given moment, the computed *udayalagna* of the planet is less than the particular *lagna* of the moment, (i.e. if the longitude of the *udayalagna* is less than that of the current *lagna*), and also if the *astalagna* of the planet computed is greater than that of the then current *lagna* (i.e. if the longitude of the *astalagna* is greater than that of the current *lagna*,) the planet is visible (i.e. above the horizon).

In the case of the Moon, however, if it is not eclipsed by the rays of the Sun, it may be visible even shortly after sunrise or a little before sunset in contradistinction to a planet which could not be seen at all during day time (except perhaps Venus). When a planet is visible, its gnomonic shadow could be computed.[1] (10)

Time after rise

If it be required to find the gnomonic shadow of the planet, then the current *lagna* and the *udayalagna* of the planet *at the moment* are to be computed. The time in between the two *lagnas*, which will be in *sāvana* measure pertaining to the planet gives the time that has elapsed after the rise of the planet. (11)

The *sāvana* measure alone is to be employed while finding the gnomonic shadow (i.e. while the zenith distance of the planet is to be computed), because the arc of the diurnal circle of the planet indicates only *sāvana* measure. Suppose the *udayalagna* falls short of the current *lagna*; then the *bhōgyakāla*, i.e. the remaining rising time of the *rāśi* in which the planet is situated added to the elapsed time of the *rāśi* of the current *lagna* together with the sum of the rising times of the *rāśis* in between, gives the difference of the *udayalagna* of the planet and the current *lagna*. (12)

Declination

The *krānti* of the planet or the declination of the foot of the latitude of the planet added to the latitude rectified called *sphuṭaśara*, gives what is called *spaṣṭa-krānti* of the planet. Its R sine is called *spaṣṭa-krāntijyā*. From this, R sin δ, R cos δ etc. are to be computed (as mentioned in *Trīpraśnadhikāra* in the context of finding the zenith-distance of the Sun).

From the time that has elapsed after the rise of the planet called the *unnata*, the shadow is to be computed as in the case of the Sun's shadow. Having thus computed the shadow or what is the same, the zenith distance of the Moon or that of the stars, the instrument called Nalaka could be pointed to the spot where that celestial body is situated. (13)

The Mahāśaṅku of the Moon or planets (R cos Z) reduced by one fifteenth of the respective daily motion gives the visible *śaṅku* when the radius is taken to be 3438. If the radius is taken as 120, 1/430th of the daily motion is to be subtracted. If the Mahāśaṅku is less then 1/15th (or 1/430th) of the daily motion, then the Moon is not visible. This applies to the other planets as well, but as this is a neglible matter, the earlier teachers did not instruct on its determination.[1] (14-15). (AS)

[1] This does not mean that the gnomon casts a shadow of the planet; it only means that it zenith distance could be computed according to the methods described in *Trīpraśnādhikāra of SiŚi* etc.

चन्द्रश्रृङ्गोन्नतिगणनम्

—आर्यभटीयार्धरात्रिकपक्षः

17. 8. 1. 'गुणखाद्रि'-'शराग्निशराः'
'पक्षनखाः' शोधिताः शशिक्रान्त्याः ।
चरखण्डकानि तद्वत् क्रमतो-
त्क्रमात् पिण्डिताश्चान्द्रम् ।। १ ।।
अर्कशशिक्रान्तिकलान्तरैक्यजीवा समान्यगोलकयोः ।
चन्द्रच्छायाकर्णेन सङ्गुणा लम्बकविभक्ता ।। २ ।।
सदृशैर्युतान्यथोना विषुवच्छायाङ्गुलैर्भुजो याम्ये ।
यत्रेन्दुर्द्वादशका कोटिस्तद्वर्गयुतिपदं कर्णः ।। ३ ।।
अर्कचन्द्रयोरन्तरांशकास्तिथिविभाजिताः शुक्लम् ।
कर्णेन चन्द्रबिम्बे द्वादशके सूर्यवच्छाया ।। ४ ।।

(Brahmagupta, *KK*, 1.7.1-4)

Computation of Moon's cusps
—Āryabhaṭa's Midnight system

Subtract 703′, 535′ and 202′ (as many times as possible) from the *sphuṭakrānti* of the Moon, first in the order as the are stated and then in the reverse order. (These minutes are the tabular differences of the *krāntis* of the last points of Meṣa, Vṛṣa and Mithuna). Calculate from the remainder the *caradala* of the Moon using the *caradalas* of the *rāśis* at the observer's station and the above numbers. Adding the result to the *caradalas* passed over, the Moon's *caradala* is obtained. (1)

Multiply the *jyā* of the difference or sum of the *krāntis* of the Sun and the Moon, according as they are in the same or opposite directions, by the hypotenuse (of the right-angled triangle, whose other sides are the gnomon and its shadow caused by the Moon), and divide by the *jyā* of the colatitude of the place. Add to or subtract from the result the number of *aṅgulas* in the *palabhā*, in the same or different directions respectively. Thus is obtained the *bhuja*, which is the base, and is to the south of the Moon's place. The perpendicular is 12 *aṅgulas*. The hypotenuse is the square root of the sum of the squares of the base and the perpendicular. (2-3)

The differences in degrees between the longitudes of the Sun and Moon, divided by 15, gives in terms of *aṅgulas*, etc., the illuminated portion of the Moon along the hypotenuse calculated above.

The obscured part in the disc of the Moon, which is of 12 digits, may be found as in the case of the Sun.[2] (4). (BC)

[1] For comments and rationale, see *SiŚi:AS*, pp. 466-70.

[2] For a demonstration of the formulae and proofs, see *KK:BC*, I. 132-34.

—लल्लः

17. 8. 2. शुक्लपक्षदिवसे द्वितीयके
भास्वदस्तसमये प्रसाधयेत् ।
तिग्मशीतकिरणौ परिस्फुटौ
शृङ्गमानमवगन्तुमैन्दवम् ॥ ६ ॥
तिग्मशीतमहसोरपक्रम-
ज्ये हते त्रिभगुणेन भाजिते ।
लम्बकेन भवतोऽग्रकागुणौ
चन्द्रशङ्कुतलमुक्तवद् धनुः ॥ ७ ॥
अग्रकानृतलयोः समाशयोः
संयुतिर्वियुतिरन्यदिक्स्थयोः ।
चन्द्रयोर्भवति बाहुरैन्दवो-
ऽग्रैव भास्करभुजस्ततोऽन्यदा ॥ ८ ॥
प्राक्कपालयुजि शीतदीधितौ
लग्नमिष्टसमयादथानयेत् ।
योजयेच्चरदलेन पश्चिमे
साधयेद्रविवदग्रकां ततः ॥ ९ ॥
तां भुजां दिनकरस्य कल्पयेत्
तद्युते शशिभुजेऽन्यदिग्गते ।
चन्द्रसूर्यभुजयोः समाशयो-
र्जायते यदवशेषमन्तरे ॥ १० ॥
स्यात् स्फुटस्तु स भुजोऽत्र योगजे
चन्द्रबाहुदिगथो वियोगजे ।
शीतदीधितिभुजेऽधिकेऽपि वा
व्यत्ययेन सवितुर्भुजेऽधिके ॥ ११ ॥
कोटिमाहुरथ शङ्कुमैन्दवं
तद्भुजाकृतियुतेः पदं श्रुतिः ।
अङ्गुलानि 'खनखै'र्विभाजिताः
सन्ति ते श्रवणकोटिबाहवः ॥ १२ ॥
व्यर्कशीतकरभागसञ्चयः
शुक्लमिन्दुदलसङ्गुणो भवेत् ।
'व्योमनन्द'विहृतः सितासितं
तद्वदेव भगणार्धवर्जितम् ॥ १३ ॥
रविशीतिकरान्तरांशजीवा
विपरीता शशिखण्डताडिता वा ।
विहृता त्रिभजीवया सितं स्या-
च्छशलक्ष्माङ्गवदङ्गुलानि तस्मिन् ॥ १४ ॥

(Lalla, *ŚiDhVr.*, 9. 6-14)

—**Lalla**

To know the cusps of the Moon, one must first find the true longitudes of the Sun and the Moon on the second day of the light half of the lunar month, at sunset. (6)

Multiply the R sine of the Sun's declination and that of the Moon separately by the radius. Divide each product by the R sine of the local colatitude. The results are respecitvely the R sines of their amplitudes. (Hence find the amplitudes). Then find the base of the altitude of the Moon as exlpained in the case of the Sun. (7)

In the case of the Moon, the sum or difference of the R sine of the amplitude and the base of the altitude, according as they are in the same or opposite directions, is called *bāhu* (*bhuja*). In the case of the Sun, the R sine of the amplitude itself is the *bāhu* (*bhuja*). (8)

(If at any other time besides sunrise and sunset, the cusps of the Moon are to be known), calculate the *lagna* for that time if the Moon is in the eastern hemisphere. But if the Moon is in the western hemisphere, increase the *lagna* by 6 Signs. (Each result should be taken as the longitude of the Sun.) Then calculate the R sines of the amplitudes as explained in the case of the Sun. (9)

The Sun's R sine amplitude is its *bāhu* (*bhuja*). If the *bāhu* (*bhuja*) of the Moon is in a direction different from the Sun, find their sum. If their directions are the same, then take their difference. The result in each case is called the 'corrected *bāhu*' (*bhuja*) or *sphuṭabāhu*.

In the first case, its direction is the same as that of the Moon's *bāhu* (*bhuja*). In the second case, its direction is the same as that of the Moon's *bāhu* (*bhuja*) if the latter is greater than the Sun's is *bāhu* (*bhuja*); if the Sun's is greater, the direction is opposite to that of the Moon's *bāhu* (*bhuja*).

(Subtract the square of the *bāhu* (*bhuja*) of the Sun and that of the Moon, respectively, from the squares of the R sines of their zenith distance. Find the square root of each difference. Find the sum or difference of these results according as the Sun and the Moon are in the same or different hemisphere. The result is called *prathama* or 'first'.

Again, if it is daytime, find the difference of the R sine altitudes of the Sun and Moon. But if it is night, then find their sum. The result is called *anya* of 'the other'. The square root of the sum of the squares of the *prathama* and the *anya* is called *koṭi* or perpendicular (and is parallel to the east-west line). (10-11)

Now, they say that the Moon's R sine altitude is the perpendicular. The square root of the sum of the squares of the base (*bāhu*) and perpendicular (*koṭi*) is the hypotenuse.

When the lengths of the hypotenuse, perpendicular and base are each divided by 200, the results are respectively the lengths in *aṅgulas*. (12)

The difference in the true longitudes of the Sun and Moon in degrees, multiplied by the radius of the Moon

and divided by 90, gives the illuminated portion (in the light half). When the above difference is diminished by 180° and the remainder is multiplied by the radius of the Moon and divided by 90, the result is the dark portion in the dark half. (13)

Or, multiply the R versed sine of the difference (in degrees) in the longitudes of the Sun and the Moon by the Moon's radius and divide by the radius. The result is the breadth of the illuminated portion of the Moon. This may be converted into *aṅgulas* as before.[1] (14). (BC)

—भास्करः १

17. 8. 3. अन्तरांशोत्क्रमां जीवां स्फुटेन्दुव्यासताडिताम् ।
षण्णगाष्टरसैर्हृत्वा सितमानं पदाधिके ।। ६ ।।

क्रमज्यामधिकोत्पन्नां त्रिज्यया योज्य तत् सितम् ।
आनयेदसितेऽप्येवमुत्क्रमक्रमतोऽसितम् ।। ७ ।।

(Bhāskara I, *LBh.*, 6. 6-7)

—Bhāskara I

(In the light half of the month) the R versed-sine of the difference (between the longitudes of the Moon and the Sun) multiplied by the true diameter of the Moon and divided by 6876 gives the measure of the illuminated part (of the Moon). When the difference exceeds a quadrant, one should add the radius to the R sine of the excess and from that (find) the measure of the illuminated part. In the dark half of the month, one should obtain, in the same way, the unilluminated part (of the Moon) with the help of the R versed sine (of the difference between the longitudes of the Moon and the Sun diminished by 6 Signs) and from the R sine (of the excess of that difference over a quadrant). (6-7) (KSS)

—भास्करः २

17. 8. 4. मासान्तपादे प्रथमेऽथवेन्दोः
शृङ्गोन्नतिर्यद्दिवसेऽवगम्या ।
तदोदयेऽस्ते निशि वा प्रसाध्यः
शङ्कुर्विधोः स्वोदितनाडिकाद्यैः ।। १ ।।

निशावशेषैरसुभिर्गतैर्वा
यथाक्रमं गोलविपर्ययेण ।
रवेरधः शङ्कुरथाक्षभाघ्नो
नरोऽर्क'हृच्छङ्कुतलं यथाशम् ।। २ ।।

सौम्यं त्वधोमुखनरस्य तलं प्रदिष्टं
स्वाग्रास्वशङ्कुतलयोः समभिन्नदिक्त्वे ।
योगोऽन्तरं भवति दोरिनचन्द्रदोष्णो-
स्तुल्याशयोर्विवरमन्यदिशोस्तु योगः ।। ३ ।।

स्पष्टो भुजो भवति चन्द्रभुजाश इन्दोः
शुद्धे तु रविभुजाद्विपरीतदिक्कः ।
योऽधो नरो दिनकृतः स विधोरुदग्र-
शङ्क्वन्वितो मम मता खलु सैव कोटिः ।। ४ ।।

दोःकोटिवर्गैक्यपदं श्रुतिः स्याद्
भुजो 'रसघ्नः' श्रवणेन भक्तः ।
प्रजायते दिग्वलनं हिमांशोः
शृङ्गोन्नतौ तत् स्फुटबाहुदिक्कम् ।। ५ ।।

चन्द्रस्य योजनमयश्रवणेन निघ्नो
व्यर्केन्दुदोर्गुण इनश्रवणेन भक्तः ।
तत्कार्मुकेण सहितः खलु शुक्लपक्षे
कृष्णेऽमुना विरहितः शशभृद्विधेयः ।। ६ ।।

(Bhāskara II, *SiSi*, 1.9. 1-6)

—Bhāskara II

Either in the last quarter of a lunation, or in the first quarter, on the day when the elevation of the cusps of the crescent Moon is to be determined, then either at the moment of moonrise or moonset or (for the matter of that, during any part of the night) the R sine of the altitude of the Moon is to be computed by noting the time from the moment of moonrise. (1)

The R sine of the altitude of the Sun is to be computed, assuming the rising Sun to be in the opposite hemisphere, south or north (i.e. if it be originally in the northern, assume it to be in the south) (and using the formula given in verse 54 of *Trīpraśnādhyāya*, given the time measured in *asus* that has elapsed after sunset). (2)

The *śaṅkutala* of the inverse altitude or the latitude below the horizon, is north (in contradistinction to what it is above the horizon). The sum or difference of the *agrā* and *śaṅkutala* according as they are of the same direction or of opposite directions, is the *bhuja*. The sum or difference of the *bhujas* of the Sun and Moon, according as they are of opposite or the same directions, is what is called the *spaṣṭa-bhuja* whose direction is to be construed as that of the Moon. If the *bhuja* of the Moon falls short of that of the Sun, then the direction of the *spaṣṭa-bhuja* is that opposite to that of the Moon. (3-4a)

I deem that the *koṭi* should be taken as the sum of the *śaṅkus* of the Sun and the Moon, the one being below the horizon and the other above, respectively. (4b)

The hypotenuse or *karṇa* is the square root of the sum of the squares of the *bhuja* and *koṭi*. The *bhuja* multiplied by 6 and divided by the *karṇa* gives what is known as the *dik-valana* of the Moon. The direction of the *valana* has the same direction as the *spaṣṭa-bhuja* defined before. (5)

The R sine of the elongation of the Moon is to be multiplied by the radius vector of the Moon measured

[1] For elucidation, see, *SiDhVr:BC*, II. 166-73.

in *yojanas*, and divided by the radius vector of the Sun, also measured in *yojanas*; the arc of the R sine so obtained is to be added to the longitude of the Moon in the bright half of the lunation and is to be subtracted from the same in the dark half.[1] (6). (AS)

—ग्रहलाघवम्

17. 8. 5. मासस्य प्रथमेऽन्तिमेऽथ वाङघ्रौ
विधुशृङ्गोन्नतिरीक्ष्यते यदह्नि ।
तपनास्तमयोदयेऽवगम्या-
स्तिथयः सावयवाः क्रमाद् गतैष्याः ।। १ ।।

'रवि'हततिथयोंऽशास्तद्वियुग्युक् क्रमेण
द्युमणिरपरपूर्वे मासपादे विधुः स्यात् ।
'नृप'गुणतिथिरूना स्वघ्नतिथ्यक्षभाघ्नी
'शरकु'हृदुदगाशा संस्कृतार्कापमांशैः ।। २ ।।

चन्द्रस्य च व्यस्तशरापमांशै-
र्द्विनिघ्नतिथ्या विहृताऽङ्गुलाद्यम् ।
संस्कारदिक्कं वलनं स्फुटं स्यात्
स्वेष्वंशहीनास्तिथयः सितं स्यात् ।। ३ ।।

उन्नतं वलनाशायामन्यस्यां स्यान्नतं विधोः ।
वलनस्याङ्गुलैः शृङ्गैः किमत्र परिलेखतः ।। ४ ।।[2]

(Gaṇeśa, *GL*, 12. 1-4)

—Grahalāghava

On the first or last quarter of the (lunar) month when the horns of the Moon are visible on any particular day during the bright and dark fortnights, the *tithis*, with their fractions, elapsed or yet to elapse, are to be calculated from sunset and sunrise, respectively. (1)

Multiply by 12 the number of *tithis* gone. To the product, add the true position of the Sun in the first quarter and subtract it in the fourth quarter. The result gives the position of the Moon.

Multiply the *tithi* by 16. From the product subtract the square of the *tithi*. Multiply it by the equinoctial shadow. Divide by 15. The result in degrees is in the northern direction. This value is to be corrected with the Sun's declination—the sum of the two if uni-directional, otherwise their difference. (Let it be x). (2)

For the Moon the process is otherwise—difference in the case of the same direction, sum otherwise. (Let it be x). Find $2x/15$. This gives the true deflection (*dik-valana*) in *aṅgulas*. From the *tithi* subtract 1/3 thereof (i.e. find $t—t/5$). That would give the phase in *aṅgulas*. (3)

[1] For detailed exposition and rationale, see *SiŚi:AS*, pp. 482-95.
[2] For the rationales, see *GL:RCP*, II. 108-12.

The elevation of the cusp is in the direction as that of the deflection. In the oppositive direction it is depressed. The elevation of the cusp is to be had only by the *valana* in *aṅgulas*. Hence what is the need of drawing a graph in this connection? (4). (VSN)

चन्द्रशृङ्गोन्नतिलेखनम्

—पौलिशः

17. 9. 1. द्विगुणेऽक्षे 'तिथ्यंशः' शृङ्गमुदक्तुङ्गमुडुगणाधिपतेः ।
देयं च भुजादेतच्छौक्ल्यं कर्णाद् द्विषट्कांशम् ।। ४ ।।

अपमान्तरविक्षेपावेकान्यत्वे युतोनितौ कोटिः ।
कर्णो रवीन्दुविवरं तत्कृतिविवरात् पदं बाहुः ।। ५ ।।

सविता यतः शशाङ्कात् कोटचा परिकल्पितस्ततः कोटिः ।
देयांशकाङ्गुलसमा भुजकर्णौ चाङ्गुलैरेव ।। ६ ।।

शशिमध्यात् प्राक्कर्णः कोटिरतोऽतो भुजः शशाङ्कगतः ।
परिधावक्षोन्नामः शौक्ल्यं मध्याद्धनुस्तत्र ।। ७ ।।

(Varāha, *PS*, 5. 4-7)

Moon's cusps—Diagram

—Pauliśa

Multiply the latitude of the place in degrees by two and divide by fifteen. By the resulting number of *aṅgulas* or digits (measured along the rim), the northern tip of the horn of the Moon should be raised upwards (as caused by the latitude at the time of first visibility). This raising should be directed upwards like the '*Bhuja*' which we are going to mention. The number of digits of illumination of the Moon's orbit, (usually called merely 'digits'), is the twelfth part of the difference in longitude in degrees, last found, and should be directed like the 'hypotenuse', which we are going to mention. (4)

The difference in declination last found should be added to the Moon's latitude or subtracted from it, as the directions of the Moon's *ayana* and its latitude by the same or different. (This refers to the visibility in the west in the evening. With reference to the visibility in the east in the morning, the addition and subtraction is done *vice versa*). The result is called '*koṭi*'. The difference in longitude is called the 'hypotenuse'. The '*Bhuja*' is the square root of the difference of the squares of the hypotenuse and the '*Koṭi*'. (5)

The '*Koṭi*' to be drawn on that side of the Moon towards the sun, north or south, which is got in computing it, using the scale, one *aṅgula*—one degree of *koṭi*. The *Bhuja* and the hypotenuse also should be drawn to the same scale. (6)

Thus, first there is the hypotenuse from the centre of the Moon to that of the Sun. From the centre of the Sun the '*Koṭi*' is laid in the direction computed for it. Then from its termination the '*Bhuja*' is laid towards the

Moon's centre. On the rim of the Moon represented by a circle of fifteen *aṅgulas*, the raising of the horn in *aṅgulas* due to the latitude of the place is to be done. At the centre of the two ends of the horns the illumination in digits is to be represented on the diameter. There the arc (forming the upper boundary of the illumination) is to be drawn (by making the arc pass through the two ends of the horn and the point in the middle to which the illumination extends.[1] (7). (TSK)

—लल्लः

17. 9. 2. यच्चिह्नं समभुवि भानुमान् स तस्माद्
दातव्यः स्वदिशि भुजस्ततोऽपि कोटिः ।
प्रागिन्द्रावपरककुङमुखी प्रतीच्यां
प्रागग्राद् दिनकरचिह्नतश्च कर्णः ।। १५ ।।

श्रवणकोटियुतैः शशिमण्डलं
श्रवणसूत्रमिहापरपूर्वकम् ।
झषवशेन च शेषदिशौ ततः
खटिकया सुपरिस्फुटमालिखेत् ।। १६ ।।

अपरतः श्रवणेन सितं नये-
दसितमप्यसिते सितदीधितौ ।
धनददिग्भवदक्षिणदिग्भवैः
परिधिभिर्जनयेच्च झषद्वयम् ।। १७ ।।

तिमियुगमुखपुच्छसक्तरज्ज्वो-
र्भवति च यत्र समागमः प्रदेशे ।
तत उडुपतिलग्नशुक्लचिह्नं
समभिलिखेत् सितसिद्धये सुवृत्तम् ।। १८ ।।

बाह्वङ्गुलानि यत एव निवेशितानि
शृङ्गं तु तन्नमति शेषमिहोन्नतं स्यात् ।
शुक्लेऽर्धबिम्बसदृशे दलितेऽर्धमौर्व्या
लाटीललाटतटरूपधरः शशाङ्कः ।। १९ ।।

प्रथमतरमुदेति शृङ्गमुच्चं
हरिणभृतोऽस्तमुपैति पृष्ठतस्तत् ।।
अनुपचिततनोस्तु केतकाग्र-
श्रियमविसंश्रयसम्भवां दधानम् ।। २० ।।

(Lalla, *ŚiDhVr̥.*, 9. 15-20)

—Lalla

Moon diagram

Mark a point on a level surface and assume it to be the Sun. From this point draw a straight line equal to the correct base (*bhuja*) and in its own direction. At the end of this line draw another straight line at right angles to it and equal to the perpendicular. If the Moon is in the eastern hemisphere, the perpendicular should be drawn to the west. If the Moon is in the western hemisphere, the perpendicular should be drawn to the east. Then draw the hypotenuse from this point to the Sun. (15)

The Moon's centre is at the point of intersection of the perpendicular and the hypotenuse. The direction of the hypotenuse is the east-west line (in the Moon's disc). Draw the north-south line at right angles to it (and passing through the centre of the Moon's disc) by means of fish-figures. All this should be drawn with chalk and very clearly. (16)

If the breadth of the illuminated portion as calculated above is for the bright half of the lunar month, it should be marked along the hypotenuse from the west point. From the same point should be marked the breadth of the dark portion, if it is for the dark half of the lunar month. Then draw two fish-figures using this point and the north and south points. (17)

With the point of intersection of the two lines joining the mouths and tails of the two fish-figures as centre, draw a circle to pass through the point marked above. This is the circle which shows the illuminated portion in the Moon's disc. (18)

The lower cusp of the Moon is on that side on which lies the base (*bhuja*) measured in *aṅgulas*, and the other is the higher cusp.

When the illuminated portion is equal to half of the Moon's disc which is bisected by the diameter, the Moon has the beauty of the forehead of a woman belonging to the *Lāṭa country*. (19)

The Moon's higher cusp rises first and sets last. The cusp of the Moon, when its crescent is very narrow, has the rich beauty of the middle portion (centre) of *ketakī* flowers. (20). (BC)

—भास्करः १

17. 9. 3. कोटिसूत्रं तदग्रोत्थमत्स्यपुच्छास्यनिःसृतम् ।। १२ ।।
चन्द्रशङ्कुमिता कोटिः पूर्वतो नीयते स्फुटम् ।
तद्भुजामस्तकासक्तं कर्णसूत्रं विनिर्गतम् ।। १३ ।।
कर्णकोटयग्रसम्पातकेन्द्रेणालिख्यते शशी ।
कर्णानुसारतस्तस्य सितमन्तः प्रवेश्यते ।। १४ ।।
कर्णः पूर्वापरे काष्ठे तन्मत्स्याद्दक्षिणोत्तरे ।
दक्षिणोत्तरयोर्बिन्दू तृतीयः सितमानजः ।। १५ ।।
त्रिशर्कराविधानोत्थमत्स्यद्वयविनिःसृतम् ।
बिन्दुत्रयशिरोग्राहिवर्त्मवृत्तं समालिखेत् ।। १६ ।।
वृत्तान्तरसितोद्भासिशृङ्गोन्नत्या प्रदृश्यते ।
ज्योत्स्नाप्रसरनिर्धूतध्वान्तराशिर्निशाकरः ।। १७ ।।

[1] For elucidation, see *PS:TSK*, 5. 4-7.

प्राक्कपाले शशाङ्कस्य लग्नेन्द्वग्रादिभिः स्फुटः ।
साध्यो बाहुरनादिष्टमपराभिमुखं स्मृतम् ।। १८ ।।
(Bhāskara I, *LBh.*, 6. 12-18)

—Bhāskara I

Lay that (base) off from the Sun in its own direction. (Then) draw a perpendicular line passing through the head and tail of the fish-figure constructed at the end (of the base). (This) perpendicular should be taken equal to the R sine of the Moon's altitude and should be laid off towards the east. The hypotenuse-line should (then) be drawn by joining the ends of that (perpendicular) and the base. (12b-13)

The Moon is (then) constructed with the meeting point of the hypotenuse and the perpendicular as centre; and along the hypotenuse (from the point where it intersects the Moon's circle) is laid off the measure of illumination towards the interior of the Moon. (14)

The hypotenuse (indicates) the east and west directions: the north and south directions should be determined by means of a fish-figure. (Thus are obtained the three points, viz.) the north point, the south point, and a third point obtained by laying off the measure of illumination. (15)

(Then) with the help of two fish-figures constructed by the method known as *triśarkarāvidhāna* draw the circle passing through the (above) three points. Thus is shown, by the elevation of the lunar horns which are illumined by the light between two circles, the Moon which destroys the mound of darkness by her bundle of light. (16-17)

(When the Moon is) in the eastern half of the celestial sphere, the true base should be found out with the help of the rising point of the ecliptic and the Moon's *agrā*, etc.; and the unmentioned element (i.e., the upright) should be laid off towards the west. (18). (KSS)

—करणरत्नम्

17. 9. 4. पूर्वापरेन्दोरपरत्र दिक्स्थां
कोटिं यथादिक् परिधौ निधाय ।
तन्मत्स्यसूत्रोपरि बाहुमानं
दत्वाऽर्धबिम्बेन लिखेच्छशाङ्कम् ।। ९ ।।

फलमिह कथितं यत् तत्तु विक्षेपजातं
विविधमतिविधेयं चक्रिणं चाम्बुदिग्धम् ।। १०a-b ।।
(Deva, *KR*, 6.9-10*a*)

—Karaṇaratna

Of the Moon lying in the eastern or western hemisphere, the true *koṭi*, which has already been (calculated and) set down at another place, should be laid off in its own direction. Then, along the head and tail line of the fish-figure drawn at the extremity of that *koṭi*, should be laid off the (true) *bāhu*. Thereafter, taking (the extremity of the true *bāhu* as centre and) the Moon's semi-diameter as radius, one should draw the Moon, which is circular, smeared with water, deflected from the ecliptic, and pertaining to which a variety of results have been set out here. (9-10ab). (KSS)

—आर्यभटः २

17. 9. 5. समभुवि बिन्दुं दत्त्वा तस्माद् वृत्तं घनाङ्गुलैः कार्यम् ।
दिक्सिद्धि तद्वृत्ते वलनं प्राच्यां यथाशमर्केन्द्वोः ।। १ ।।

दद्याद् वरुणाशायां व्यस्ताशं सर्वदा वलनम् ।
स्पर्शविमोक्षाविन्दोः प्राक् पश्चादन्यथा भानोः ।। २ ।।

मानैक्यार्धेन लिखेद् वृत्तं च ग्राह्यखण्डसूत्रेण ।
वलनाग्रबिन्दुसूत्रस्य युतिर्मानैक्यखण्डवृत्तेन ।। ३ ।।

या तस्यास्तद्वृत्ते लेख्यौ व्यस्ताशकौ शरौ शशिनः ।
भानोर्यथागताशौ बाणाग्राद् बिन्दुगं सूत्रम् ।। ४ ।।

धार्यं तद्ग्राह्यार्धजवृत्तयुतौ स्पर्शमोक्षकौ स्याताम् ।
वलनाग्राभ्यां मत्स्यं विलिख्य तत्पुच्छमुखसूत्रे ।। ५ ।।

दद्याद् बिन्दोर्माध्यं व्यस्ताशेषु विधौ रवौ स्वाशम् ।
तद्बाणाग्राद् विलिखेद् ग्राहकखण्डेन वृत्तं च ।। ६ ।।

तद्ग्राह्यवृत्तयुतिवच्छन्नं स्यात्परममर्केन्द्वोः ।
बिन्दोर्बाहुं दद्याद् वलनसूत्रेऽथ तस्याग्रात् ।। ७ ।।

दद्यात् कोटिशलाकां यथाशकां सौम्ययाम्यायाम् ।
श्रवणशलाकां बिन्दोर्दद्यात् कोटय्ग्रगां तयोर्योगात् ।। ८ ।।

लेख्यं ग्राहकमण्डलदलेन वृत्तं भवेदसौ ग्रासः ।
इष्टोऽथ निमीलनकं ह्युन्मीलनकं च मर्दभवैः ।। ९ ।।

शृङ्गोन्नतौ हिमांशोर्मण्डलखण्डेन मण्डलं कुर्यात् ।
सितपक्षे प्राग्वलनं दद्याद् असिते दिगङ्कितं पश्चात् ।।१०।।

बिन्दोर्वलनसूत्रे कोटिं दद्यात् तदग्रतो वृत्तम् ।
कर्णजसूत्रे विलिखेदिन्दोः स्याच्छृङ्गयोः संस्था ।। ११ ।।

शशिशुक्लत्वेऽर्धोने साध्या शृङ्गोन्नतिर्गणकैः ।
बिम्बादौ परिलेखेऽङ्गुलानि लिप्तासमान्यत्र ।। १२ ।।
(ABh. II, *Mahā.*, 8. 1-12)

—Āryabhaṭa II

Upon an even surface, having fixed a point (*bindu*), describe from it a circle with (a radius of) 40 digits (*aṅgulas*). Fix the cardinal points thereon. In that circle, in the east, the deflection (*valana*) is to be laid off in the same direction as the Sun and Moon; and in the west always in the opposite direction. In a lunar (eclipse) contact (*sparśa*) and separation (*vimokṣa*) take place in the east and west (respectively); in a solar (eclipse) the contrary (is the case). (1-2)

Draw (with the same centre, a second) circle with (a radius equal to) half the sum of the diameters (of the eclipsing and eclipsed bodies) (*mānaikyārdha*), and (a third) with a line (equal to) half (the diameter of) the eclipsed body (*grāhyakhaṇḍa*) (as the radius). Where the line (joining) the extremities of the deflection and the centre (*valanāgrabindusūtra*) meets the circle (with the radius of) half the sum of the diameters (of the eclipsing and eclipsed bodies) (*mānaikyakhaṇḍavṛtta*), there draw the latitudes of the Moon onto that circle, with opposite directions (as calculated); and (those) of the Sun in the direction as obtained. From (either) extremity of the latitude a line is to be drawn to the centre.

(The two points, at which) these (lines) cut the circle (with the radius equal to) half (the diameter of) the eclipsed body (*grāhyārdhajavṛtta*) are (the points of) contact and separation. (3-5ab)

From the extremities of the deflection, draw a fish figure. On the line joining the mouth and tail of it, lay off from the centre, the latitude for the middle (of the eclipse), in the opposite direction for the Moon, and in the same direction for the Sun. From the extremity of this latitude draw a circle with (a radius equal to) half (the diameter of) the eclipsing body (*grāhakakhaṇḍa*). (5cd-6)

(The portion of) the circle of the eclipsed body (*grāhyavṛtta*), cut by this (circle), is the maximum obscuration of the Sun or Moon.

From the centre lay off the base (*bāhu*) on the line (joining the extremity) of the deflection (and the centre). From its end lay off a stick (equal in length to) the perpendicular (*koṭiśalākā*) in the proper direction, either north or south. Place a stick (equal in length to) the hypotenuse (*śravaṇaśalākā*) from the centre touching the end of the perpendicular. From (the point) where they touch draw a circle (with a radius equal to) half the diameter of the eclipsing body. (The portion it cuts from the circle of the eclipsed body) is the (amount of) obscuration at a given time. (Similarly), the points of immersion (*nimīlanaka*) and emergence (*unmīlanaka*) (can be projected with the deflection and the latitudes) of a total obscuration. (7-9)

(For the projection of) the elevation of the lunar cusps (*śṛṅgonnati*) draw a circle (with a radius equal to) half the diameter of the Moon. In the bright half of the lunar month, the deflection is to be laid off in the east; and in the dark (half), the direction be marked in the west. (10)

On the line (joining the centre and the extremity) of the deflection lay off the perpendicular from the centre. From its end draw a circle with a line (equal in length to) the hypotenuse, (as radius. The points, at which it cuts the main circle, indicate) the position of the lunar cusps. (11)

The elevation of the lunar cusps is to be drawn by astronomers only when the illuminated part is less than half (the Moon's diameter). In drawing the diameter etc. digits (*aṅgula*) are (to be considered) equal to minutes.[1] (12). (SRS)

—भास्करः २

17. 9. 6. व्यर्केन्दुकोटचंश'शरेन्दु'भागो
हारोऽमुना 'षट्कृति'तो यदाप्तम् ।
द्विष्ठं च हारोनयुतं तदर्धे
स्यातां क्रमादत्र विभास्वभाख्ये ।। ७ ।।

सूत्रेण बिम्बमुडुपस्य षडङ्गुलेन
कृत्वा दिगङ्कमिह तद्वलनं ज्यकावत् ।
मासस्य तुर्यचरणे वरुणेशदेशात्
प्राग्भागतः प्रथमके सुधिया प्रदेयम् ।। ८ ।।

केन्द्राद्विभां तद्वलनाग्रसूत्रे
कृत्वा विभाग्रे स्वभया च वृत्तम् ।
ज्ञेयेन्दुखण्डाकृतिरेवमत्र
स्यात् तुङ्गशृङ्गं वलनान्यदिक्स्थम् ।। ९ ।।

(Bhāskara II, *SiŚi.*, 1. 9. 7-9)

—Bhāskara II

Let the compliment of the elongation (corrected as directed in verse 6) divided by 15 be the denominator; let the numerator be 36; take the result after division and put it in two places; with this and the complement of the elongation divided by 15, using *saṅkramagaṇita*, we have successively *Vibhā* and *Svabhā*. (7)

Draw a circle with radius 6 *aṅgulas* to represent the disc of the Moon. Mark the disc with the cardinal points signifying the east, west, north and south. Compute the *valana* as directed in verse (5) (which represents E′ G′ in fig. 119) and mark it off as a R sine from the west point W in the last quarter and from the east point E in the first quarter. (8)

From the centre M of the Moon's disc, mark off the *Vibhā* MC (computed as directed) along the join of MG′. With centre C and radius *Svabhā* (already computed as directed) draw a circle. The spherical sector of the Moon's globe thus demarcated by the arc of the circle ADB, namely AGBD, is found to have the elevated cusp in the opposite direction in which the *valana* has been marked.[2] (9). (AS)

[1] For diagrams and rationale, see *Mahā:SRS*, II. 138-43.
[2] For details, see, *SiŚi:AS*, pp. 494-98. See also the fig. therein, no. 119.

18. ग्रहास्तोदयः – HELIACAL RISING AND SETTING OF PLANETS

ग्रहास्तोदयः

18. 1. 1. चरनाडीक्रमविधिना द्युव्यासाद्यथामति च विक्षेपात् ।
अस्तमयोऽप्यध्वविधिः शेषाणां युक्तितश्चिन्त्यम् ॥५१॥
(Varāha, *PS*, 4.51)

Heliacal rising and setting

For the luminaries other than the Sun and the Moon, (*i.e.* for the star-planets), while carrying out the several operations, and using their respective latitude and day-diameter, and getting the *caranāḍīs* etc. in terms of their respective *sāvana* days, not only the work of finding the shadow for the given time and time for the given shadow as above, but also their daily risings and settings and reduction to different localities, should be thought out and done. (51). (TSK)

ग्रहाणां उदयास्तदिक्

18. 1. 2. लघुगोऽल्प इनादुदेति पूर्वे
भूयान् भूरिगतिर्ग्रहः प्रतीच्याम् ।
भूयांल्लघुगः परत्र चास्तं
प्राच्यां भूरिजवो लघुः प्रयाति ॥ ११ ॥
(Gaṇeśa, *GL*, 9. 11)

Direction of rising and setting

The planet which moves slower than the Sun, rises heliacally in the east if its *rāśimāna* is also lesser than that of the Sun. The planet having a quicker motion than the Sun and a greater *rāśimāna* riser in the west.

The planet with slower motion and greater *rāśimāna* sets in the west; that with quicker motion and lesser degree sets in the east.[1] (11). (VSN)

ग्रहाणामस्तोदयदिनानि

18. 2. 1. 'नखेन्दवो'-'ष्टिः' 'खगुणा' 'द्विजिह्वाः'
'षट्पुष्करा' व्यस्तदिनानि पश्चात् ।
प्राच्यां च चन्द्रात्मजदैत्यगुर्वो-
'र्दन्ताः' 'शरव्योम्नित्चराः' प्रदिष्टाः ॥ १४ ॥
'खाङ्गर्तुभिः' 'कृतगुणैः' 'नवाङ्गरामैः' 'महीविशिखपक्षैः'।
'द्विकृतगुणैः'-भौमाद्याः पश्चात् पुनरस्तमायान्ति ॥ १५ ॥
(Vaṭeśvara, *Vsi.*, 2-4. 14-15)

Days of setting and rising

120, 16, 30, 8 and 36 are the days during which the planets, Mars etc., remain in heliacal setting in the west. Mercury and Venus are said to remain in heliacal setting in the east for 32 and 75 days, respectively. (14)

After 660, 34, 369, 251, and 342 days (since rising in the east in the case of Mars, Jupiter and Saturn and in the west in the case of Mercury and Venus) the planets, Mars etc., again set in the west. (15). (KSS)

18. 2. 2. उदयास्तविलोमयानसीम्ना-
मधिकोनाः कलिका हृता दिनानि ।
मृदुसंस्कृतया ग्रहस्य गत्या
रहिताशूच्चजभुक्तिलिप्तकाभिः ॥ २६ ॥
(Lalla, *ŚiDhVr.*, 3. 26)

The difference in minutes between the (last) *śighra-kendra* of a planet (obtained while calculating its true longitude), and that for its heliacal rising, setting or retrograde motion, when divided by the difference in minutes between the motion of the *śighrocca* and the planet's motion after correction or *mandasphuṭagati*, gives the days passed or to be passed in respect of any of the above phenomena. (26). (BC)

ग्रहास्तोदयकालभागाः

—भास्करः १

18. 3. 1. कृतदर्शनसंस्कारो भार्गवोऽर्कान्तरस्थितैः ।
अंशकैर्नवभिस्तेभ्यो द्व्यधिकैर्द्व्यधिकैः क्रमात् ॥ १ ॥
दृश्यन्ते सूरिवित्सौरिमाहेया निर्मलेऽम्बरे ।
कालभागा दिगभ्यस्ता विज्ञेयास्ता विनाडिकाः ॥ २ ॥
राशेस्तस्यैव पूर्वस्यां सप्तमस्यापरोदये ।
स्वदेशभोदयैः कालं ज्ञात्वा दर्शनमादिशेत् ॥ ३ ॥
(Bhāskara I, *LBh.*, 7. 1-3)

Planetary elongation for setting and rising
—Bhāskara I

Multiply the number of *ghaṭikās* passed in the day of a planet by the number of *ghaṭikās* in the day of the other planet, and divide by the length of the day of the former. If this result is equal to the number of *ghaṭikās* passed in the day of the second planet, there is conjunction of the two planets.[1] (4). (BC)

—भास्करः १

समकलत्वम्

19. 3. 4. इष्टग्रहान्तरं भाज्यं प्रतिलोमानुलोमगम् ।
भुक्तियोगविशेषेण दिनादिस्तस्य लभ्यते ॥ ४ ॥

[1] For the rationale, see *KK:BC*, I. 155-56.

स्फुटभुक्त्यानुपाताप्तफलेनासन्नयोगिनाम् ।
ग्रहाणां शुद्धिकल्पाभ्यां कुर्यात् समकलावुभौ ।। ५ ।।

पातभागास्ततः शोध्याः शीघ्रोच्चात् सितसौम्ययोः ।
'कृतद्व्यष्टर्तुककुभो' द्विगुणास्ते कुजादितः ।। ६ ।।

'नवार्कर्त्वर्करवयो' दशघ्नाः क्षिप्तिलिप्तिकाः ।
पातांशोनभुजामौर्वीसंगुणाः सौम्यदक्षिणाः ।। ७ ।।

विष्कम्भार्धहृतो घातो मन्दशीघ्रोच्चकर्णयोः ।
भूताराग्रहविवरं भागहारः प्रकीर्तितः ।। ८ ।।

विक्षेपलिप्तिका लब्धास्ताभिरन्तरमिष्टयोः ।
एकदिक्त्वे विशिष्टाभिर्युक्ताभिर्भिन्नदिक्कयोः ।। ९ ।।

चतुर्भागाङ्गुला लिप्ता ग्रहयोरन्तरं स्फुटम् ।
वर्णरश्मिप्रभायोगादूह्यमन्यत् स्वया धिया ।। १० ।।

(Bhāskara I, *LBh.*, 7. 4-10)

—Bhāskara I

Common longitude

Divide the difference between the longitudes of the two given planets by the sum or difference of their daily motions according as they are moving in unlike or like directions: then are obtained the days, etc. (elapsed since or to elapse before the time of conjunction of the two planets). The longitude of those two neighbouring planets should then be made equal up to minutes of arc by subtracting from or adding to their longitudes their motions (corresponding to the above days, etc.) obtained by proportion with their true daily motions. (4-5)

Latitudes of the two planets

In the case of Mercury and Venus, subtract the longitude of the ascending node from that of the *śighrocca*: (thus is obtained the longitude of the planet as diminished by the longitude of the ascending node). The longitudes (in terms of degrees) of the ascending nodes of the planets beginning with Mars are respectively 4, 2, 8, 6, and 10, each multiplied by 10.

The greatest latitudes, north or south, in minutes of arc, (of the planets beginning with Mars), are respectively, 9, 12, 6, 12, and 12, each multiplied by 10. (To obtain the R sine of the latitude of a planet), multiply (the greatest latitude of the planet) by the R sine of the longitude of the planet minus the longitude of the ascending node (of the planet) (and divide by the 'divisor' defined below).

The product of the *mandakarṇa* and the *śighrakarṇa* divided by the radius is the distance between the Earth and the planet: this is defined as the 'divisor'.

Thus are obtained the minutes of arc of the latitudes (of the two planets which are in conjunction in longitude). (6-9a)

Distance between the two planets

From those latitudes obtain the distance between those two given planets by taking their difference if they are of like directions or by taking their sum if the are of unlike directions.

The true distance between the two planets, in minutes of arc, being divided by 4 is converted into *aṅgulas*.

Other things should be inferred from the colour and brightness of the rays of the (two) planets or else by the exercise of one's own intellect. (9b-10). (KSS)

—लल्लः

ग्रहसमागमः

19. 3. 5. मन्दकर्णमथ शीघ्रकर्णवत्
संविधाय चलकर्णताडितम् ।
तं भजेत् त्रिभवनज्यया फलं
भूग्रहान्तरमुशन्ति तद्विदः ।। १ ।।

ग्रहाणां समागमकालनिर्णयः

'पञ्च'भि'र्दश'भि'रिन्द्रियेन्दु'भि-
'र्व्योमबाहु'भिरथे'षुलोचनैः' ।
चन्द्रयोजनतनुर्हृताऽऽस्फुजि-
ज्जीवसौम्यशनिभौममूर्तयः ।। २ ।।

व्यासखण्डकृतिघातिता तनु-
र्भूग्रहान्तरहतेन्दुकर्णहृत् ।
योजनत्वमपहाय जायते
सैव तस्य कलिकामयी स्फुटा ।। ३ ।।

योजनानि दशभिर्हृतानि वा
मध्यमाः स्युरथ मानलिप्तिकाः ।
ताडितास्त्रिभवनज्यया पुन-
र्भूग्रहान्तरविभाजिताः स्फुटाः ।। ४ ।।

'नन्द''सूर्य''रस''सूर्यभानवो'
'दिग्गु'णाः शरकलाः कुजादितः ।
'वेद''लोचन''गजा''ङ्ग''खेन्दवः'
पातजाः स्युरथ 'दिग्गु'णा लवाः ।। ५ ।।

क्षितिसुतगुरुसूर्यसूनुपाताः
स्वचलफलोनयुता तथा तथैव ।
शशिसुतसितयोस्तु पातभागाः
स्वमृदुफलेन च संस्कृताः स्फुटाः स्युः ।। ६ ।।

ग्रहाणां युतिकालः समकलिकत्वं च

निजगतिविवरेण संविभक्ता
विवरकलास्त्वनुलोमयोर्दिनानि ।
ऋजुगमनविलोमभुक्तियुत्या-
भ्यधिकगतावधिके युतिर्गता तैः ।। ७ ।।

अनधिकगमनेऽधिकेऽथ वक्रि-
ण्यपि चरितान्तरलिप्तिका गतिघ्नाः ।
गतियुतिविवरोद्‌धृतास्तथैव
स्वफलमृणं स्वमिते गते च योगे ।। ८ ।।

धनमृणमथ तद्विलोमगे स्तः
समकलिकौ समलिप्तिकाद्विपातात् ।
त्रिदशगुरुमहीजसूर्यजानां
भृगुतनयेन्दुजयोस्तथैव शीघ्रात् ।। ९ ।।

निजमध्यमबाणसङ्गुणा
भुजजीवा कुखगान्तरोद्‌धृता ।
स शरो भवति स्फुटो रवि-
ग्रहणोक्त्या नतिसंस्कृतो विधोः ।। १० ।।

क्षेपयोर्वियुतिरेकगोलयो-
र्या च भिन्नककुभोर्भवेद् युतिः ।
अन्तरं तदुभयोः प्रकीर्तितं
तद्दलैक्यलघुभेदकारकम् ।। ११ ।।

(Lalla, *ŚiDhVṛ.*, 11. 1-11)

—Lalla

Planetary conjunction

Find the *manda* hypotenuse of a planet following the method for the *śīghra* hypotenuse. Then multiply it by the *śīghra* hypotenuse and divide the product by the radius. The wise astronomers say that the quotient is the distance between the centre of the earth and the planet. (1)

Time of conjunctions

If the diameter of the Moon measured in *yojanas* is divided by 5, 10, 15, 20, and 25, the results are, respectively, the diameters of Venus, Jupiter, Mercury, Saturn and Mars (upon the Moon's orbit, when they are at their mean distances from the Earth). (2)

When the diameter of a planet (expressed in *yojanas*) is multiplied by the square of the radius and divided by the product of the distance between the centre of the Earth and the planet, and the Moon's distance from the Earth, (both in *yojanas*), the result is converted into minutes of the true angular diameter of the planet. (3)

Or, (when the diameter of a planet) in *yojanas* is divided by 10, the quotient is the mean angular diameter in minutes. This again, when multiplied by the radius and divided by the distance between the centre of the Earth and the planet, gives the true angular diameter in minutes. (4)

The latitudes of Mars, (Mercury, Jupiter, Venus and Saturn when at their mean distances from the Earth), are, respectively, 9, 12, 6, 12 and 12 minutes, each multiplied by 10. 4, 2, 8, 6 and 10, each multiplied by 10, are, respectively, the degrees (in the longitudes) of the nodes (of the above planets). (5)

The nodes of Mars, Jupiter and Saturn become more accurate when corrected by adding to their longitudes (given above), or subtracting from time, the respective *śighraphalas* of the planets, according as these are additive or subtractive. But the nodes of Mercury and Venus become more accurate when corrected by adding to the longitudes, or subtracting from them, their respective *mandaphalas*, according as they are additive or sub-subtractive.[1] (6).

Time of conjunction and equality of longitudes

If two planets are moving in the same direction, divide the difference of their longitudes in minutes by the difference of their true daily motions. The quotient gives the days elapsed since the conjunction, if the faster of the two planets is ahead. If the slower is ahead, the conjunction will take place after so many days. (7)

If, again, one planet is direct and the other retrograde, divide the difference of their true longitudes, expressed in minutes, by the sum of their true daily motions. If the retrograde planet has the greater longitude, the conjunction will take place after the days in the quotient; if lesser, the conjunction has taken place. (8)

Multiply the difference between the true longitudes of the two planets severally by the true daily motion of each planet and divide each product by the sum of difference of their true daily motions, as the case may be. Add the quotients to the respective longitudes of the planets if the conjunction is to take place, and subtract if the conjunction has taken place. If the planet is retrograde, add the quotient if the conjunction has taken place and subtract if it is to take place. Then the two planets will have true equal longitudes expressed in minutes.

Now, in the case of Mars, Jupiter and Saturn, subtract the correct longitudes of their respective nodes from their true longitudes when thus made equal. But in the case of Mercury and Venus, subtract the correct longitudes of their nodes from the longitudes of their respective *śighroccas* at the time when the planets themselves have true equal longitudes. (9)

Find the R sine of the remainder in each case. Multiply it by the greatest mean (geocentric) latitude of the planet and divide by its distance from the centre of the Earth. The result is the true (geocentric) latitude

[1] For mathematical notes see *ŚiDhVṛ:BC*, II. pp. 177-79.

of the planet. This again should be corrected by the latitudinal parallax of the planet as in the case of the Moon, following the method given (in the chapter on) Solar eclipse. (10)

The differences of the latitudes (of the two planets of equal longitudes), when of the same denomination, or their sum when of different denominations, is said to be the distance between the centres of the two planets. When this distance is less than the sum of their radii, the conjunction is called *Bhedayuti*.[1] (11). (BC)

ग्रहाणां बिम्बमानम्

19. 3. 6. 'व्यङ्घ्रीषवः' 'सचरणा ऋतवः' 'त्रिभाग-
युक्ताद्रयो' 'नव' च 'सत्रिलवेषव'श्च ।
स्युर्मध्यमास्तनुकलाः क्षितिजादिकानां
त्रिज्याशुकर्णविवरेण पृथग्विनिघ्न्यः ॥ १ ॥

त्रिघ्न्या निजान्त्यफलमौर्विकया विभक्ता
लब्धेन युक्तरहिताः क्रमशः पृथक्स्थाः ।
ऊनाधिके त्रिभगुणाच्छ्रवणे स्फुटा स्युः
कल्प्यं खलु त्रिकलमङ्गुलमत्र बिम्बे ॥ २ ॥

युतिकालज्ञानम्

दिवौकसोरन्तरलिप्तिकौघाद्
गत्योर्वियोगेन हृताद्यदैकः ।
वक्री जवैक्येन दिनैरवाप्तै-
र्याता तयोः संयुतिरल्पभुक्तौ ॥ ३ ॥

वक्रेऽथवा न्यूनतरेऽन्यथैष्या
द्वयोरनृज्वोर्विपरीतमस्मात् ।
दृक्कर्म कृत्वायनमेव भूयः
साध्येति तात्कालिकयोर्युतिर्यत् ॥ ४ ॥

एवं कृते दिविचरौ ध्रुवसूत्रसंस्थौ
स्यातां तदा वियति सैव युतिर्निरुक्ता ।
दृक्कर्मणायनभवेन न संस्कृतौ चेत्
सूत्रे तदा त्वपमवृत्तजयाम्यसौम्ये ॥ ५ ॥

(Bhāskara II, *SiŚi.*, 1.10. 1-5)

Angular diameters of planetary orbits

The mean diameters of Mars, Mercury, Jupiter, Venus and Saturn are respectively 4′ 45″, 6′ 15″, 7′ 20″, 9′, 5′ 20″. (1)

These estimates being multiplied by the difference of the radius and *śighrakarṇa* and divided by thrice the *śighra-antyaphalajyā* are to be added or subtracted from the mean values above given according as the *śighrakarṇa* is less or greater than the radius to give the rectified values. Three minutes of arc to be constructed as one *aṅgula* in this respect.[1] (2)

Time of conjunction

To obtain the time of the conjunction of two planets, compute the difference of the longitudes of the two planets, and divide by the difference of their daily motions. If one of the planets be retrograde, divide by the sum of the daily motions. The result gives the number of days approximately after the moment of conjunction if the slower planet has a longitude falling short of that of the quicker. (3)

If one of the planets be retrograde, and if its longitude be the lesser, then also the conjunction was past by the number of days computed. In the other cases the conjunction is to take place after the number of days computed. If, however, both the planets be retrograde, then if the slower of them has a longitude less than that of the quicker, then the conjunction is ahead, otherwise past by the number of days. (4a)

Having computed the approximate time of conjunction, obtain the true motions of the planets pertaining to that day, rectifiy them for *āyana-dṛkkarma* and following the process indicated in verse (3) above, again compute the moment of conjunction. (This will be a good approximation). This conjunction will be the one on the polar latitudinal circle. If *āyana-dṛkkarma* be not done, then the conjunction will be on the circle of celestial latitude. (4b-5). (AS)

19. 3. 7. 'पञ्च-र्त्व-गा-ङ्क-विशिखाः' पृथ'गीश'कर्णा-
योगाहताः 'प्रकृति-भा-न्वरि-सिद्ध-रामैः' ।
भक्ताः फलोनसहिताः श्रवणेऽधिकोने
ते त्र्युद्धृताः स्युरसृजो वपुरङ्गुलानि ॥ १ ॥

युतेर्यातैष्यता

अधिकजवखगेऽधिकेऽल्पभुक्ते-
रथ कुटिलेऽल्पतरेऽनुलोमतो वा ।
अनृजुगखगयोस्तु शीघ्रगेऽल्पे
युतिरनयोः प्रगताऽन्यथा तु गम्या ॥ २ ॥

गतगम्यदिवसाः

ऋजुगतिखगयोस्तु वक्रयोर्वा
विवरकला गतिजान्तरेण भक्ताः ।
गतिजयुतिहृता यदैकवक्री
युतिरगता प्रगताप्तवासरैः स्यात् ॥ ३ ॥

दक्षिणोत्तरान्तरम्

चाल्यौ खेटौ समौ स्तो
ग्रहयुतिदिवसैश्चन्द्रबाणः स्वनत्या
संस्कार्योऽत्र ग्रहौ स्वेषुदिशि
समदिशोस्त्वल्पबाणोऽपरस्याम् ।

---

[1] For the rationale, see *ŚiDhVṛ:BC*, II, pp. 179-83.

[1] For comments, see *SiŚi:AS*, pp. 501-02.

एकान्याशौ यदेषू विरहित-
सहितौ खेटमध्येऽन्तरं स्याद्
भेदो मानैक्यखण्डादिह लघुनि
तदाल्पं हि किं लम्बनाद्यम् ॥ ४ ॥

(Gaṇeśa, *GL*, 13. 1-4)

Mean diameters of Mars and other planets

Mars 5, Mercury 6, Jupiter 7, Venus 9, Saturn 5 (minutes): Multiply this, in order, by the difference between 11 and the *śighrakarṇa* of the planet. Divide this result respectively by 21, 12, 6, 24, and 3. (Let the result be x.)

If the hypotenuse (*karṇa*) is more than 11, subtract x from the first table; add x if it is otherwise. (Let the result by y). Then y divided by 3 gives the diameter of the planet in *aṅgulas*. (1)

Conjunctions gone and yet to occur

If the planet with quicker daily motion has a greater longitude, then the conjunction has taken place already. If the retrograde planet is lesser in longitude than the other in direct motion, then also conjunction is over. When both the planets are retrograde, if the planet with quicker motion has lesser longitude, then conjunction has already taken place. In the reverse case, conjunction is yet to occur. (2)

Number of days before or after conjunction

When both the planets are in direct or retrograde motion, find the difference of their longitude and divide by the difference of their daily motions. The quotient gives the number of days. Both values should be in *kalās*.

If one is retrograde, divide by the sum of their daily motions. The number of days before or after the conjunction is to be decided as before. (3)

North-south latitudinal difference

Rectify the moment of the conjunction after knowing the number of days (from verse 3). The planets will have the same value is *rāśis*, degrees etc. The latitude of the moon is to be corrected for its parallax.

The direction of the planet and its latitude will be the same. If the two latitudes are in the same direction, then the planet with lesser value is in the direction opposite to that of the other.

If the directions of the latitudes are the same, take their difference; if the direction are different, add. That gives the difference in *aṅgulas* between their discs, (x). If x is less than the sum of radii of the two discs, the two planets intersect. Since the *lambana* is very small, what is the use of these factors here?[1] (4). (VSN)

[1] For explanation and rationale, see *GL:RCP*, II. pp. 114-20.

20. ग्रहनक्षत्रयुतिः – CONJUNCTION OF STARS AND PLANETS

ग्रहनक्षत्रयुतिः विक्षपांशाश्च

20. 1. 1. योगभागसमः सर्वः संयुक्तो लक्ष्यते ग्रहः ।
अधिकोनकलाकालविज्ञानं चानुपाततः ॥ ५ ॥

विक्षपांशाः

उदग्दिशोऽर्कभूतानि याम्ये पञ्च दिशो भवाः ।
उदग् रसास्तया व्योम दक्षिणे मुनयोऽम्बरम् ॥ ६ ॥

उदगर्कास्तथा विश्वे दक्षिणे मुनयोऽश्विनौ ।
सौम्ये रसकृतिः सैका याम्ये सार्धास्त्रयाग्नयः ॥ ७ ॥

अब्धयो वसवः सार्धाः सप्त शैलास्ततः परम् ।
उदक् त्रिंशत् कृतिः षण्णां याम्ये लिप्तास्त्रिषट्ककाः ॥

उदगर्काश्च विश्वे च द्विरभ्यस्ता नभस्तथा ।
विक्षेपांशाः क्रमाद् दृष्टाः पण्डितैर्वाजिभादितः ॥ ६ ॥
(Bhāskara I, *LBh.*, 8. 5-9)

Conjunction of stars and planets

All planets, whose longitudes are equal to the longitude of the junction-star of a *nakṣatra* can be seen in conjunction with that star. (Of a planet and a star) whose longitudes are unequal, the time of conjunction has to be determined by proportion. (5)

Latitudes of the junction-stars

North, ten, twelve, five; south, five, ten, eleven; north, six, zero; south seven, zero; north, twelve, thirteen; south, seven, two; north, thrity-seven; south, one and a half, three, four, eight and a half, seven, seven; north, thirty, thirty-six; south, eighteen minutes of arc; north, twenty-four, twenty-six, and zero—these have been stated by the learned to be the degrees (unless otherwise stated) of the latitudes of the junction stars of the *nakṣatras* beginning with Aśvinī in their serial order. (6-9). (KSS)

ग्रहतारासमागमन्यायः

20. 2. 1. ध्रुवकादूनः पश्चादधिकः प्राग्वक्रितेऽन्यथा योगः ।
अन्यद्ग्रहमेलकवद् ध्रुवक्रान्तेर्भविक्षेपाः ॥ ७ ॥[1]
(Brahmagupta, *KK*, 1. 9. 7.)

[1] *Dhruvaka* of a *yogatārā* is the distance on *krāntimaṇḍala* between the beginning of Meṣa and the point where the *dhruvaprota* passing through the *yogatārā* meets the *krāntimaṇḍala*.
Vikṣepa of a *yogatārā* is the distance of the *yogatarā* from its *dhruvaka* measured on *dhruvaprota*.

Principle of star-planet conjunction

If the longitude of a planet corrected by the *āyana-dṛkkarmakalā* is less than the *dhruvaka* of the *yogatārā*, the conjuction is yet to take place; if greater, the conjunction has taken place. This rule is applicable when the planet has direct motion. If the planet is retrograde, the rule is reversed. The rest of the calculation (as regards the time of conjunction, etc.) is the same as in the case of the conjunction of the two planets. (7)

ग्रहताराच्छादनम्

20. 3. 1. छादयति योगतारां मानार्धोनाधिकाद् भविक्षेपात् ।
स्फुटविक्षेपो यस्याधिकोनको भवति स समदिक्स्थः ॥
विक्षेपोंऽशद्वितयादधिको वृषस्य सप्तदशभागे ।
यस्य ग्रहस्य याम्यो भिनत्ति शकटं स रोहिण्याः ॥ १५ ॥
विक्षेपेऽन्त्ये सौम्ये तृतीयतारां भिनत्ति पित्र्यस्य ।
इन्दुर्भिनत्ति पुष्यं पौष्णं वारुणमविक्षिप्तः ॥ १६ ॥
(Brahmagupta, *KK*, 1. 9. 14-16)

Occultation of stars by planets

When a planet is on the same side of the ecliptic as the *yogatārā* of any *nakṣatra*, the planet will occult the *yogatārā*, if its *sphuṭavikṣepa* is either greater than the difference of its semi-diameter and the *vikṣepa* of the *yogatārā* or less than the sum of the two.[1] (14)

When the longitude of a planet, corrected by the *āyanadṛkkarmakalā*, is 1 sign 17° and its *vikṣepa* is greater than 2° S, it occults the Cart of Rohiṇī. (15)

When the Moon has the maximum north *vikṣepa* it occults the third star of Maghā. When it has no *vikṣepa* it occults Puṣya, Revatī and Śatabhiṣaj. (16). (BC)

रोहिणीशकटभेदः

20. 4. 1. वृषे सप्तदशे भागे यस्य याम्योंऽशकद्वयात् ।
विक्षेपोऽभ्यधिको हन्याद् रोहिण्याश्शकटं तु सः ॥ १३ ॥
ग्रहवद् द्युनिशे भानां कुर्याद् दृक्कर्म पूर्ववत् ।
ग्रहमेलनविज्ञेयं ग्रहभुक्त्या दिनादिकम् ॥ १४ ॥
(*SūSi.*, 8. 13-14)

Occultation of Rohiṇī by planets

In Taurus, the seventeenth degree, a planet of which the latitude is a little more than two degrees, south, will

[1] For a demonstration see, *KK:BC*, I. p. 135-36.

split the wain of Rohiṇī (i.e., the V-shaped constellation of Hyades. (13)

Calculate, as in the case of the planets, the day and night of the asterisms, and perform the operation for apparant longitude (*dṛkkarman*), as before: the rest is by the rules for the conjunction (*melaka*) of planets, using the daily motion of the planet as divisor: the same is the case as regards the time. (14). (Burgess)[1]

20. 4. 2. गवि'नगकु'लवे खगोऽस्य चेद्
यमदिगिषुः 'खशरा'ङ्गुलाधिकः ।
कभशकटमसौ भिनत्त्यसृक्
शनिरुडुपो यदि चेज्जनक्षयः ।। ७ ।।

स्वर्भानावदितिभतोऽष्टऋक्षसंस्थे
शीतांशुः कभशकटं सदा भिनत्ति ।
भौमार्क्योः शकटभिदा युगान्तरे स्यात्
सेदानीं न हि भवतीदृशि स्वपाते ।। ८ ।।

(Gaṇeśa, *GL*, 11. 7-8)

If any planet with 17 degrees in Vṛṣabha has its southern latitude exceeding 50 *aṅgulas*, it cuts the *śakaṭa* of the star Rohiṇī (i.e. the V-shaped constellation of Hyades). If Mars, Saturn and Moon do so, then it brings greater calamity to the people. (7)

If Rāhu stays in any of the eight stars counting from Punarvasu the Moon always cuts Rohiṇī.

This *bheda* with respect to Mars and Saturn will happen in the next aeon (*yuga*). Their *pātas* are such that it will not happen in this *yuga*.[2] (8)

चन्द्रनक्षत्रयोगः

20. 5. 1. यावत्या यद्दिशाक्षिप्त्या यावांस्तारासमागमः ।
तावत्या तद्दिशाक्षिप्त्या तावानिन्दुः समो भवेत् ।। १० ।।

अष्टिर्दशगुणा लिप्ता विक्षेपस्य यदोत्तरे ।
निरुणद्धि तदा व्यक्तं कृत्तिकातारकां शशी ।। ११ ।।

उत्तरां परमां क्षिप्तिं गत्वा शिशिरदीधितिः ।
आवृणोति स्वबिम्बेन मघामध्यस्थतारकाम् ।। १२ ।।

आरोहति शशी षष्टया प्राजेशशकटं स्फुटम् ।
अष्टिवर्गेण याम्यायां योगतारा विलिख्यते ।। १३ ।।

याम्यगं पञ्चहीनेन शतेन त्वाष्ट्रतारकम् ।
मैत्रं शतेन सार्धेन द्विशत्या शक्रतारकम् ।। १४ ।।

सप्ताशीत्या शशी हन्ति तारां सौम्यविशाखयोः ।
याम्यगो दक्षिणाशास्थो व्यक्तं शतभिषग्जिनैः ।। १५ ।।

पुष्यं पौष्णं च पातस्थो निरुणद्धि निशाकरः ।
यष्टियुक्तकलाक्षिप्त्या भेदः स्याद् ग्रहधिष्णयोः ।। १६ ।।

(Bhāskara I, *LBh.*, 8. 10-16)

[1] For notes, see *Sū.Si : Burgess*, pp. 248-49.

[2] For the rationale see *GL: RCP*. II. p. 103-4.

Occultation of stars by the Moon

The Moon is in (absolute) conjunction with a junction-star when its longitude and celestial latitude, both in magnitude and direction, are the same as the longitude and celestial latitude of the star both in magnitude and direction. (10)

Latitudes of the Moon occulting certain stars

When the Moon atains 160 minutes (of arc) of north latitude, it clearly covers the junction-star of the *nakṣtara* Kṛttikā (i.e., the Pleiades). (11)

Having attained her maximum northern latitude, the Moon covers with its disc the central star of the *nakṣatra* Maghā. (12)

With its latitude 60′ (south), the Moon clearly occults the cart of Rohiṇī (i.e., the V-shaped constellation of Hyades); and with latitude 256′ south it covers the junction-star (of Rohiṇī) (i.e., Aldebaran). (13)

With its latitude 95 (minutes of arc) south, (the Moon covers the junction-star of) the *nakṣatra* Citrā (i.e., Spica); with 150 (minutes of arc) south, (the junction-star of) the *nakṣatra* Anurādhā; and with 200 (minutes of arc) (south), (the junctuion-star of) the *nakṣatra* Jyeṣṭhā (i.e., Antares). (14)

With latitude 87 (minutes of arc south), the Moon clearly occults (the brighter of) the two northern stars of the *nakṣatra* Viśākhā; with 24 (minutes of arc) south, (the junction-star of) the *nakṣatra* Śatabhiṣak (i.e., Aquarii). (15)

The Moon, situated at its ascending Node, occults (the junction-star of) Puṣya and Revatī (i.e., Piscium).

The above occultations (*bheda*) of the stars by the planet (Moon) are based on the minutes of latitude determined from actual observation by means of the instrument (called) Yaṣṭi. (16). (KSS)

20. 5. 2. प्राजापत्यदले स्थितस्तु हिमगुर्याम्यैः शरांशैस्त्रिभि-
र्वित्र्यंशैः शकटं भिनत्ति विदलैस्तैः पञ्चभी रोहिणीम् ।
सौम्यैः पञ्चभिरंशकैश्च विदलैस्तारां मघामध्यमां
विक्षेपेण विवर्जितस्तु गुरुभं पौष्णं तथा वारुणम् ।।

(Lalla, *ŚiDhVṛ.*, 11. 11)

The Moon, when in the middle of the asterism of Rohiṇī, pierces the Cart (of Rohiṇī), if its southern latitude is 2° 40′, and occults the principal star, Rohiṇī, when its southern latitude is 4° 30′.

Again, the Moon occults the middle star of the asterism Maghā, when it has a north latitude of 4° 30′. When it has no latitude, it occults Revatī, Puṣya and Śatabhiṣā. (11). (BC)

नक्षत्रग्रहयोगसमयः

20. 6. 1. विधेयमायनं ग्रहे स्वदृष्टिकर्म पूर्ववत् ।
स्फुटश्च खेटसायको ग्रहर्क्षयोगसिद्धये ॥ ६ ॥

युतिकालज्ञानम्

ग्रहध्रुवान्तरे कला नभोगभुक्तिभाजिताः ।
गतागताप्तवासरैर्युतिर्ग्रहेऽधिकोनके ॥ १० ॥

विलोमगे नभश्चरे गतैष्यताविपर्ययः ।
ग्रहर्क्षदक्षिणोत्तरान्तरं नभोगयोगवत् ॥ ११ ॥

(Bhāskara II, *SiŚi*.. 1.11. 9-11.)

Time of star-planet conjunction

The *āyana-dṛkkarma* is to be done (with respect to the planet) and the *sphuṭaśara* is to be computed to know the time of (polar latitudinal) conjunction. (9)

The difference in the longitudes of the planet and the star, divided by the daily motion of the planet, gives the number of days approximately after or before the moment of conjunction.[1] (10)

If the planet be retrograde, the conjunction past or future will be in the reverse, i.e. future or past. (11). (AS)

[1] For the rationale, see *SiŚi:AS*, pp. 512-13.

21. नूतना आविष्काराः — NOVEL INNOVATIONS

राशिगोलस्फुटानीतिः

ग्रहणबीजम्

21. 1. 1. इन्दुमार्गतिरश्चीनं द्विस्पृक्सूत्रं भवेद् यदा ।
तदैव परमासत्तिर्ग्रहणे सोमसूर्ययोः ॥ १ ॥

मध्यकाले तु न तथा द्विस्पृक्सूत्रस्य संस्थितिः ।
परमग्रासकालोऽतो भिद्यते मध्यकालतः ॥ २ ॥

(Acyuta, *Rāśigola.*, 1-2)

True longitude computation on the sphere of zodiac

Essence of an eclipse

In an eclipse,[1] the maximum nearness of the Sun and the Moon occurs when the straight line joining the centres of the two (*dvi-spṛk-sūtra*) is perpendicular to the Moon's orbit. (1)

At the moment of conjunction or opposition (of the Sun and the Moon) (*madhyakāla*[2] or *sphuṭa-parvānta*), the line joining the centres is not so, (i.e., not perpendicular to the Moon's orbit). Consequently, the moment of maximum eclipse is different from the moment of conjunction or opposition. (2). (KVS)

पर्वान्ते पक्षद्वयम्

21. 1. 2. अर्कमार्गतिरश्चीनां रेखां प्राप्नोति चन्द्रमाः ।
यदा, तदा स्फुटैक्यं स्याद्, इति केचन सूरयः ॥ ३ ॥

पाताद् यावतिथे भागे क्रान्तिवृत्ते रविर्भवेत् ।
विक्षेपमण्डले चन्द्रः पातात् तावतिथेऽन्तरे ॥ ४ ॥

यदा भवेत्, तदैव स्यात् पर्वान्त इति केचन ।
अर्कमार्गतिरश्चीनसूत्रात् पातानुसारतः ॥ ५ ॥

प्राग्वा पश्चाच्च भवति वर्त्मसाम्यं, ततोऽपि च ।
पातासन्नप्रदेशे स्यात् सन्निकर्षः परस्तयोः ॥ ६ ॥

व्यहीन्दावोजपदगे पातः पृष्ठगतस्तयोः ।
पुरोगतो युग्मपदे; तस्मान्मध्याख्यकालतः ॥ ७ ॥

परमग्रासकालोऽयं प्राक्पश्चाच्च भवेत् क्रमात् ।
आसत्तिकालः पर्वान्ताद् भिन्नः पक्षद्वयेऽप्यतः ॥ ८ ॥

भेदस्य तारतम्ये हि केवलं कलहो भवेत् ।
विविच्य नोक्तो भेदोऽयं यद्यप्यार्यभटादिभिः ॥ ९ ॥

तथापि युक्तिसिद्धत्वात् स्वीकृतो ह्यच्युतादिभिः ।

(Acyuta, *Rāśigola.*, 3-9)

Two views on conjunction

Some scholars are of opinion that the true longitudes (*sphuṭa*) (of the Sun and the Moon) are equal when the Moon reaches the perpendicular drawn from the Sun's *viz.*, the ecliptic) (to cut the Moon's orbit). (3)

Others, however, say that moment of conjucntion (*parvānta*)[1] occurs only when the Moon in its orbit (*vikṣepa-maṇḍala*) is as distant in degrees (*bhāga*) from the Node) (*pāta*) as the Sun is in its orbit. (4-5a)

The point of equality in distance (*vartma-sāmya*) on the Moon's orbit will fall either to the East or West of the perpendicular drawn to the Sun's path according as to whether the (proximate) Node is to its East or its West. The point of closest proximity lies further from the point of equality to the side where the node lies. (5b-6)

If Moon-*minus*-Node (*vyahīndu*) is in odd quadrant, the Node will be behind the two, and if it be in an even quadrant the Node will be in front of them. And therefore the moment of maximum eclipse will, respectively, be before or after the moment of conjunction. (7-8a)

Thus according to both views, the moment of maximum eclipse differs from the moment of conjunction. A dispute can therefore occur only in the estimation of this difference. (8b-9a)

Although this distinction (between the moments of maximum eclipse and the so-called *madhyakāla* or *parvānta*) has not been expressly distinguished by Ārya-bhaṭa and others, it is recognized by Acyuta and others, since it is obvious by inference. (9b-10a). (KVS)

---

[1] The expression 'in an eclipse' (*grahaṇe*) presupposes that the centre of the Sun and the Moon in their respective orbits are very near the Node, so that the small arcs from the Node to the centres may be taken as straight lines. Thus, the Node, the Sun and the Moon may be taken as the vertices of a triangle. Then the least distance of a point to a straight line is the perpendicular from that point to the straight line.

[2] In Indian astronomy by *madhyakāla* is meant the *sphuṭaparvānta* and not, as it would seem from the term, the moment of the middle of the eclipse. Cf., *Sūryasiddhānta*, 4. 16: *Sphuṭatithyavasāne tu madhya-grahaṇam ādiśet.*

[1] *Parvānta* really applies to both the moments of conjunction and opposition but, for the sake of facility of expression, it is translated by 'conjunction' alone (which is the case in solar eclipses), here as also below.

पर्वान्तनिर्णयः—प्रथमः पक्षः

21. 1. 3. मध्यकाले ह्यर्कबिम्बात् स्फुटक्षेपान्तरे विधुः ।। १० ।।

ततः प्रागथवा पश्चादर्कासत्तिर्भवेदिति ।
ज्ञातुं तत्कालसरणिर्विज्ञेया शीतदीधितेः ।। ११ ।।

विधोस्तत्कालसरणिः कथं ज्ञेयेति चेच्छृणु ।
द्युषष्ट्यंशजभूपृष्ठस्फुटगत्यन्तरं भुजम् ।। १२ ।।

दिनषष्ट्यंशजस्पष्टक्षेपखण्डः शराभिधः ।
तयोर्वर्गैक्यमूलं स्यात् तत्कालसरणिर्विधोः ।। १३ ।।

अर्कमार्गानुसारी स्याद् बाहुस्तद्वद्यस्तदिक् शरः ।
चन्द्रमार्गात्मकः कर्णः प्रमाणक्षेत्रमीदृशम् ।। १४ ।।

मध्यक्षेपः श्रुतिर्बाहुः परमासत्तिकालजम् ।
बिम्बान्तरं चन्द्रमार्गे तयोरग्रान्तरं शरः ।। १५ ।।

इच्छाक्षेत्रमिदं; तत्र ज्ञातेन श्रवणेन हि ।
अज्ञातौ दोःशरौ नेयावनुपातेन; तद्यथा ।। १६ ।।

प्रमाणक्षेत्रकर्णस्य यद्येतौ बाहुसायकौ ।
तदेच्छाक्षेत्रकर्णस्य कौ स्तो बाहुशराविति ।। १७ ।।

इच्छाक्षेत्रगतौ स्यातां बाहुबाणौ; तयोः शरः ।
गत्यन्तरात्मको ज्ञेयो यतोऽसौ चन्द्रमार्गतः ।। १८ ।।

दिनषष्ट्यंशसम्बन्धिस्फुटगत्यन्तरात्मना ।
प्रमाणक्षेत्रकर्णेन नाडिकैका भवेद् यदि ।
तदेच्छाक्षेत्रबाणे कः काल इत्यनुपाततः ।। १९ ।।

परमग्रासकालस्य भेदः स्यान्मध्यकालतः ।
द्विः कृत्वो हरणं कार्यं कर्णेनैवं यतस्ततः ।। २० ।।

मध्यक्षेपाच्छरहतात् कर्णकृत्याप्तनाडिकाः ।
स्वर्णं कुर्यान्मध्यकाले तयोर्दिग्भेदसाम्यतः ।। २१ ।।

परमग्रासकालोऽयं, मध्यक्षेपाद् भुजाहतात् ।
कर्णाप्तो बिम्बभेदः स्यात् परमग्रासकालजः ।। २२ ।।

तदूनं बिम्बयोगार्धं भवेद् ग्रासप्रमा परा ।
विधोरर्ककलाप्राप्तिः पर्वान्त इति यन्मतम् ।। २३ ।।

तन्मते प्रोक्तमखिलं युज्यते नात्र संशयः ।

(Acyuta, *Rāśigola.*, 10b-24a)

Determination of Conjunction: First view

At the moment of conjunction, the angular distance of the Moon from the Sun is equal to its latitude corrected for parallax (*sphuṭa-vikṣepa*). In order to know where the point of maximum nearness to the Sun will occur, to the East or West of (the moment of conjunction), it is necessary to scan the path of the Moon at the moment. (10b-11)

If you desire to know the path of the Moon at that moment, listen.



(Let) the (*bhujā*) be one-sixtieth of the difference between the daily motions (of the Sun and the Moon) (*dyu-gatyantara*) as corrected for parallax (*bhūpṛṣṭha-sphuṭa*), (MR); and let one-sixtieth part of the variation in latitude (*kṣepa-khaṇḍa*) per day as corrected for parallax (*spaṣṭa*) be what is called the 'altitude' (*śara*, the other side of the right-angled triangle), (QR). Then the root of the sum of their squares (MQ) will give the Moon's path for that period (*viz.* one *nāḍikā*). (12-13)

The base (of the right-angled triangle so formed) is parallel to the Sun's path, the altitude perpendicular to it and the hypotenuse along the orbit of the Moon. Thus is established the antecedent triangle (*pramāṇa-kṣetra*) (MRQ) (where the values of all the sides are known). (14)

The latitude at the moment of conjunction (*madhyakṣepa*) (SM) is the hypotenuse, the line joining (the centres of) the orbs (of the Sun and the Moon) at the moment of maximum eclipse (SP), the base, and the line along the Moon's orbit joining the ends of the above two lines (PM), altitude: thus is the consequent triangle (*icchā-kṣetra*) (SPM) established. (15-16a)

Here, (in this consequent triangle), since the hypotenuse, (which is the latitude at the moment of conjunction), is known, the base and altitude can be derived by proportion (with the antecedent triangle). This is how it is: (16b)

If such are the base and altitude of the antecedent triangle, what would be the base and altitude of the consequent triangle? (By means of this argument will be derived the base and altitude of the consequent triangle:

$$SP = \frac{SM \cdot MR}{MQ}; \qquad MP = \frac{SM \cdot QR}{MQ} \qquad (17)$$

Of these two, the altitude, since it lies along the Moon's orbit, should be understood to have its value in terms of the relative motions (*gaty-antara-ātmaka*) (*per nāḍikā* projected upon the Moon's orbit). (18)

And if the hypotenuse of the antecedent triangle (MQ), which represents the relative motions (of the

Sun and the Moon) for one-sixtieth of a day, is one *nāḍkā*, what time will the altitude of the consequent triangle represent? This proportion will give the time between the moments of maximum eclipse and conjunction, *i.e.*:

$$\frac{MP}{MQ} = \frac{SM \cdot QR}{MQ \cdot MQ}. \qquad (19\text{-}20a)$$

Since, (in the above calculation), division with the hypotenuse (MQ of the antecedent triangle) is to be done twice, the resultant *nāḍikās* (are) obtained by multiplying the latitude at conjunction by the altitude, and dividing the product by the square of the hypotenuse (of the antecedent triangle, *i.e.*, $\frac{SM \cdot QR}{MQ^2}$.) (20b-21a)

(These *nāḍikās*) are to be added to, or subtracted from, the moment of conjunction, according as to whether the directions (North or South) of the two, (*viz.*, the latitude and altitude), are different or the same, respectively.[1] This is the moment of maximum eclipse. (21b-22a)

Multiply the latitude at conjunction (SM) by the base (MR) and divide by the (antecedent) hypotenuse (MQ); the result will be the distance between (the centres of) the orbs) (of the Sun and the Moon) at the moment of maximum eclipse, *i.e.*, $SP = \frac{SM \cdot MR}{MQ}$. (22b)

This, subtracted from half the sum of the angular diameters (*bimba*) (of the Sun and the Moon), will give the maximum eclipse. (23a)

All that is said here accords, in fact, only with the school that says that the moment of conjunction is when the Moon attains the same (number of) minutes (*kalās*) as the Sun, (both measured along the ecliptic). (23b-24a). (KVS)

पर्वान्ते द्वितीयपक्षखण्डनम्

21\. 1. 4. वर्त्मसाम्यं हि पर्वान्त इति पक्षे विधोर्गतिः ।। २४ ।।

क्षेपवृत्तानुसारी स्यात् ततोऽस्य बाहुता कथम् ।
तर्हि गत्यन्तरांशस्य बाहुत्वं नेह कल्प्यते ।। २५ ।।

किन्तु कर्णत्वमिति चेद्, भवत्वेवं शशिग्रहे ।
रविग्रहे तु कर्णत्वमिति तस्या न युज्यते ।। २६ ।।

यतो नतिवशादिन्दोर्वर्त्म भिन्नं प्रतिक्षणम् ।
अनुगत्यन्तरांशस्य बाहुत्वं भास्वतो ग्रहे ।। २७ ।।

बाणत्वं नतिखण्डस्य पक्षेऽस्मिन् यदि कल्प्यते ।
तदा तयोर्वर्गयोगमूलस्यात्रेन्दुमार्गता ।। २८ ।।

इति चेन्न यतो नात्र तयोर्दोःकोटिरूपता ।
तथा हि नतिखण्डः स्याद्व्यस्तदिक्कोऽर्कमार्गतः ।। २९ ।।

गत्यन्तरांशकश्चास्मिन् पक्षे स्यादिन्दुमार्गतः ।
अतोऽनयोर्मिथो न स्याद्दोःकोटित्वमिति स्थितम् ।।३०।।

किञ्च लम्बनखण्डेन घटिकाकालजेन च ।
ऊनितो गतिभेदांशो बाहुर्ज्ञेयः पुरोदितः ।। ३१ ।।

तत्र लम्बनखण्डोऽयं रविमार्गगतो भवेत् ।
गत्यन्तरांशकश्चात्र चन्द्रमार्गगतो यतः ।। ३२ ।।

ततोऽनयोर्वियोगोऽपि वस्तुतस्तु न युज्यते ।
एतद्दोषनिरासार्थं यद्यत्र नतिलम्बने ।। ३३ ।।

तयोः खण्डौ च नीयन्ते भास्करोक्तेन[1] मार्गतः ।
तर्हि लम्बनखण्डस्य गत्यन्तरलवेषु हि ।। ३४ ।।

युक्तैव संस्कृतिः किन्तु विक्षेपनतिखण्डयोः ।
मिथो योगो वियोगो वा नोपपन्नो भवेत् तदा ।। ३५ ।।

यतो नतिः क्षेपवृत्ततिरश्चीनेव तन्मते ।
क्रान्तिवृत्ततिरश्चीनो विक्षेपः सर्वसम्मतः ।। ३६ ।।

एवं ह्युभयतःपाशारज्जुरत्रापतिष्यति ।
किञ्च गत्योर्वियोगोऽपि पक्षेऽस्मिन् नैव युक्तिमान् ।।३७

भिन्नमार्गगतत्वस्य तयोरप्यविशेषतः ।
"लग्नोनान्त्येन्दुदोःकोट्यो"रित्यादाविन्दुलग्नयोः ।।३८ ।।

वियोगोऽपि न युक्तोऽत्र यतस्तौ भिन्नवृत्तगौ ।
किञ्चात्र "कृतनत्येन्दोः क्षिप्त्यानीतं स्थितेर्दलम् ।।३९।।

कृत्वा तत्काललम्बं च पर्वान्ते निर्णयस्तयोः"[3] ।
इत्युक्तस्थितिदलस्यानीतिरपि न युज्यते ।। ४० ।।

यतः स्थितिदलक्षेत्रगतिभेदांशरूपयोः ।
इच्छाप्रमाणयोर्नात्र वस्तुतस्तुल्यरूपता ।। ४१ ।।

तस्माद्विधोरन्त्यभुक्तिरन्त्यस्फुट इति द्वयम् ।
क्रान्तिवृत्तानुसार्यैव स्वीकर्तव्यं रविग्रहे ।। ४२ ।।

तथा च सूर्यशशिनोर्गत्योश्च स्फुटयोरपि ।
विश्लेषो युज्यते तद्वद् भुजाद्यानीतिरेव च ।। ४३ ।।

क्रियाक्रमे त्वन्त्यभुक्तिरपि विक्षेपवृत्तगा ।
गृह्यतेऽतो भुजादीनामानीतिर्नातिसुन्दरा ।। ४४ ।।

रशिगोलस्फुटैक्यं हि यदा स्यादर्कचन्द्रयोः ।
स एव कालः पर्वान्तो ग्राह्यः सूर्यग्रहे सदा ।। ४५ ।।

अन्यथा लम्बसंस्कारः पर्वान्ते नैव युज्यते ।
क्रान्तिवृत्तकलारूपा यतो लम्बनलिप्तिकाः ।। ४६ ।।

(Acyuta, *Rāśigola.*, 24-46)

[1] This follows from the following consideration: When the Moon at conjunction is in advance of the Node, this correction has to be deducted because the maximum-eclipse-position is behind the Moon; under this conditon the *vikṣepa* and the *śara* are both North or both South, *i.e*,. there is sameness of direction, (*dik-sāmya*). Hence the rule: '*Dik-sāmye ṛṇa*', 'Deduction when the directions are the same'. When the Moon at conjunction is behind the Node, the maximum-eclipse-point is in advance of the Moon and hence the correction has to be added. Under this condition, the *vikṣepa* and *śara* are of different directions. one North and the other South. Hence the rule '*Dig-bhededhanam*', 'Addition when the directions are different.

[1] *Mahābhāskarīya*, 5. 27-28.
[2] Acyuta's *Uparāgakriyākārama*, 3. 28ff.
[3] *Ibid.*, 3.41.

Refutation of the second view

But, according to the school which says that the moment of conjunction is equality of distance (from the node), (the calculations as described above are impossible for the several reasons set out below): (24b)

(i) (Firstly), how can this, (*viz.*, the relative motion per *nāḍikā*, MR), be taken as the base in view of the fact that the motion of the Moon is (measured) along its own orbit? (25a)

(ii) It may be argued that the relative motion per *nāḍikā* (*gaty-antara-aṁśa*) is not taken as the base, but only as the hypotenuse. (But it has to be noted that) this might be so in the case of the lunar eclipse; but, in the case of the solar eclipse it cannot be taken as the hypotenuse, since the path of the Moon is changing every moment owing to parallax in latitude (*nati*). (25b-27a)

(iii) If, according to this school and with reference to the solar eclipse, it is argued: Let the relative motion (along the Moon's path) (*anu-gaty-antara-aṁśa*) be taken as the base, and the variation in latitude corrected for parallax (*nati-khaṇḍa*) as the altitude, then the root of the sum of their squares will give the path of the Moon. (27b-28)

(The answer is:) No, because in this case they do not form the base and altitude (of a right-angled triangle); for, the latitudinal variation is perpendicular to the Sun's path and the longitudinal variation is (measured), according to this school, along the Moon's path and hence there cannot be any base-altitude relationship between them. (29-30)

(iv) Further, (if it is said that) the base taken above is the relative variation in longitude (*gati-bheda-aṁśa*) minus the variation in parallax in longitude (*lambana-khaṇḍa*) per *nāḍikā* (*ghaṭikā-kālaja*); (31)

(this is improper); for, here, the variation in parallax in longitude is measured along the Sun's path; but the relative variation in longitude is (measured) along the Moon's path; (so these twoare different); hence the subtraction of one from the other is, in fact, not possible. (32-33a)

(v) If however, in order to remove this objection, the parallaxes in latitude (*nati*) and longitude (*lambana*) and their variations (*khaṇḍas*) be calculated according to the method prescribed by Bhāskara, then, the rectification (*saṁskāra*, addition or subtraction) of the variation in longitude by the variation in parallax in longitude is permissible; but addition or subtraction between variations in latitude (*vikṣepa-khaṇḍa*) and variation in parallax in latitude (*nati-khaṇḍa*) will not be possible, for, according to Bhāskara, the parallax in latitude is (measured) perpendicularly to the Moon's orbit, and the latitude is (measured), according to all, perpendicularly to the ecliptic. (33b-36)

Thus, (according this school), every approach leads us to a dilemma. (37b)

(vi) Again, according to this school, even the subtraction of the velocity of one from the other is not possible because the two are (measured), along different paths. (37b-38a)

(vii) Then again, according to this school, the subtraction between the Moon and the rising point of the ecliptic (*lagna*), as required in the (verse) beginning with, "of the *bhujā* and *koṭi* of Final-Moon-*minus-lagna*", is also impossible, because the two move in different circles. (38b-39a)

(vii) Now there is the rule: "Calculate the half-duration of the eclipse (*sthiter-dala*) from the Moon's latitude as corrected for parallax, (*kṛta-natyā kṣiptyā*); calculate also the parallax in longitude (*lamba*) for the times (*tat-kāla*) obtained, (*viz.* the beginning and end of the eclipse); and thus determine them at conjunction." (39b-40)

The calculation of the half-duration of the eclipse according to this rule is also not possible, since, really, there is no similarity between the fields on which the half-duration and the relative variation in motion are represented, (*viz.*, the ecliptic and the Moon's orbit) which form, respectively, the consequent (*icchā*) and the antecedent (*pramāṇa*). (41)

Therefore in the solar eclipse, the two, the rectified velocity of the Moon (*antya-* or *saṁskṛta-bhukti*) and latitude corrected for parallax, have to be measured only in relation to the ecliptic, (the former along it and the latter perpendicular to it). (42)

Again, it would be proper to take the differences between the velocities of the Sun and the Moon and that between their rectified latitudes and so also in the matter of the determination of the sines etc. (43)

In the *Kriyākrama*, the rectified velocity too is measured along the (planet's) orbit, and hence the derivation of the sines etc. is not quite accurate. (44)

In the solar eclipse, that moment alone is to be taken as the moment of conjunction when the rectified latitudes of the Sun and the Moon on the celestial sphere (of which the ecliptic is a great circle) are identical. (45)

Otherwise, corrections for parallax would not be correct at the moment of conjunction, for the seconds of

parallax (*lambana-liptāḥ*) are in terms of the seconds of the circle of the ecliptic. (46). (KVS)

राशिगोलस्फुटसंस्कारः

21. 1. 5. इन्द्वादीनामपि गतिः क्रान्तिवृत्तानुसारिणी ।
अतो न क्षेपतो भेदः स्फुटस्यापीति यन्मतम् ।। ४७ ।।

समलिप्ताकाल एव पर्वान्तस्तन्मते भवेत् ।
चन्द्रादयः क्षेपवृत्ते भ्रमन्ति सततं यतः ।। ४८ ।।

ततः स्फुटोऽपि तेषां स्यात् स्वतोऽपि क्षेपवृत्तगः ।
इति पक्षे हि पर्वान्तः साम्यकालो न केवलम् ।। ४९ ।।

अस्मिन् पक्षे हि चन्द्रस्य रशिगोलस्फुटाप्तये ।
स्फुटीकरणतः पश्चात् कार्यं यत्नान्तरं यतः ।। ५० ।।

तत्प्रकारश्चाच्युतेन कीर्तितः स्फुटनिर्णये ।
"पातोनस्य विधोस्तु कोटिभुजयोर्जीवे मिथस्ताडये-
दन्त्यक्षेपशराहतं वधममुं विक्षेपकोट्या हरेत् ।
लब्धं व्यासदलोद्धृतं हिमकरे स्वर्णं, विपाते विधौ
युग्मायुग्मपदोपगे; विधुरयं स्पष्टो भगोले भवेत्" ।।

इत्यत्र वासना ज्ञेया कलास्वन्तरवद् बुधैः ।। ५२ ।।

अयमेव हि संस्कारो लघूकृत्य क्रियाक्रमे ।
तेनैव "क्षेपवीरांशं कुर्याद्" इत्यादिनेरितः[1] ।। ५३ ।।

राशिगोलस्फुटानीतिरच्युतेनैवमीरिता ।
क्रान्तिवृत्तगतिश्चैवमानेया गोलवित्तमैः ।। ५४ ।।

(Acyuta, *Rāśigola.*, 47-54)

Correction for Reduction to the Ecliptic

Now, according to the view of those who consider that the true motions of the Moon and the other (planets) are given (by the *śāstrakāras*) along the ecliptic and hence their true longitudes are not vitiated by their orbital motion (*kṣepataḥ* means *kṣepa-vṛtta-gamanataḥ*), the moment of equality in degrees will itself give the moment of conjunction (*parvānta*). (47-48a)

On the other hand, according to the view that since the Moon and other (planets) always move on (their own) orbits *kṣepa-vṛtta*) and hence their true longitudes (*sphuṭa*) are (measured) on their orbits, the moment of conjunction is not equality in degrees (measured on the ecliptic). (49b-50)

It is because, according to this view, a further correction has to be applied to the true longitude (as measured on its orbit) to obtain the true longitude as measured on the ecliptic (*rāśigola-sphuṭa-āptaye*), that a method to this effect has been enunciated by Acyuta in the *Sphuṭanirṇaya*:

"Multiply the tabular cosine (*koṭijyā*) and sine (*bhujājyā*) of Moon-minus-Node and the product by the tabular versine (*śara*) of the maximum latitude (*antya-kṣepa*) of the Moon. Divide this by the tabular cosine of the latitude at the particular moment and the quotient is to be divided again by the tabular radius (*vyāsa-dala*). The result (will give the correction for longitude which) is to be added to, or subtracted from, the Moon's longitude, as Moon-minus-Node is in an even or an odd quadrant, respectively. The True-Moon measured on the ecliptic is thus got."[1]

[1] Acyuta's *Uparāgakriyākrama:*

The proof for this may be understood by wise men learned in the (nuances of astronomical) science (*kalāsu*). (50-52)

This very correction has been enunciated in a simplified form by the same (author) in (his *Uparāga-*) *Kriyākrama* (ch. 1, verse 41) in the words "Apply one twenty-fourth part of the latitude" etc.[2] (53)

Thus has been enunciated the "True-longitude Computation on the Sphere of Zodiac" by Acyuta. True longitudes (of planets) on the ecliptic should be calculated by experts in this manner. (54). (KVS)

स्फुटचन्द्राप्तिः

ग्रन्थोद्देशः

21. 2. 1. अधोऽधः क्रमशोऽतीतचन्द्रतत्तुङ्गसङ्गमात्
प्रत्यहं वाक्यनवकात् 'स्फुटचन्द्राप्ति'रुच्यते ।। २ ।।

श्रुतुमात्रे प्रकारेऽस्मिन् न स्याद् यस्यातिविस्मयः ।
स्वस्यैवानधिकारेण स न गृह्णात्विमां गतिम् ।। ३ ।।

प्रणम्य प्रणये युष्मान् साधवो माधवोऽस्म्यदः ।
भवद्भ्यः प्रणतोन्नत्यै भवद्भ्यः किं न लभ्यते ।। ४ ।।

(Mādhava, *Sphuṭa.*, 2-4)

Computation of True Moon

Aim of the work

(Herein below) is expounded the *Computation of True Moon* by means of placing, daily, one below the other, nine numerical expressions (*vākya-s*) as calculated from (the time of) the (previous) conjunctions of the Moon and its Higher Apsis. (2)

(Ifever there be) one who is not delighted on hearing about this method, let him not accept it. To be sure, he will not have the ability (to practise it). (3)

Oh! ye good souls! I, Mādhava, bow before you and beseech you. For, what does not one obtain from you who are bent upon elevating those who bend before you. (4). (KVS)

[1] For elucidation and rationale, see *Rāśigolasphuṭānīti*: *K. V. Sarma*, Intro., pp. 12-14.

[2] For elucidation and rationale, see, *op. cit.*, Intro., pp. 14-15.

ध्रुवसाधनानि

21. 2. 2. 'दीननम्रानुशास्यो'नं दिनराशिं कलेर्गतम् ।
'शिवदूता'ऽऽहतं हत्वा 'पर्याप्तहृदये'न यत् ॥ ५ ॥

लभ्यते तेन कर्तव्या वक्ष्यमाणविधेर्ध्रुवाः ।
तेनैवाद्यस्तथैकैकरहितेन तदष्टकम् ॥ ६ ॥

वाक्यसंख्याः

शिष्टात् तु 'शिवदूता'प्ता वाक्यसङ्ख्याऽग्रिमा ततः ।
मुहुः प्रक्षिप्त'पर्याप्तहृदया'त् क्रमशः पराः ॥ ७ ॥

ध्रुवकालाः

पृथक् तच्छेषरहित'शिवदुता'त् 'प्रिया'ऽऽहतात् ।
'धृतालय'हृता नाड्यो ध्रुवकाला इमे स्मृताः ॥ ८ ॥

ध्रुवः

लिप्तादि 'सत्त्ववान् रामो' 'मौनकामे'ऽग्रिमे फले ।
स च 'विश्वैकनाथ'श्च तस्मिन् 'धृति'युते ध्रुवः ॥ ९ ॥

ततोऽधिकं तु तत्रांशा 'गो'गुणा 'वि'गुणाः कलाः ।
'सु'गुणा विकलास्तासु तद्'गौरां'शं विशोधयेत् ॥ १० ॥

Basis for zero-corrections

From the elapsed Kali days (for any desired date) deduct (a *khaṇḍa*, a lump number of days, equal to) 15,02,008 (*dīnanamrānuśāsya*). Multiply the remainder (*khaṇḍaśeṣa*) by 6845 (*śivadūta*) and divide by 1,68,611 (*paryāptahṛdaya*).[1] The quotient (got is called *dhruva-sādhana* and) is to be used for deriving the several zero-corrections (*dhruvas*) to be used for calculations which will be enunciated below. The first *dhruva* (is to be calculated) using this quotient itself (*agrimaphala*), while the further eight (*dhruvas*) are to be derived from this *dhruva* reduced increasingly by 1. (5-6)

Moon-sentence numbers

Divide the remainder (in the division in 5) by 6845 (*śivadūta*). The quotient obtained will be the first Moon-sentence-number (*vākyasaṅkhyā*).[2] The further (eight sentence-numbers can be obtained) in the same manner from the division by 6842 (*śivadūta*) of the successive remainders to which 1,88,611 (*paryāptahṛdaya*) has been added. (7)

[1] *Rationale*: *dīnanamrānuśāsya* (15,02,008) is a *khaṇḍa* (Lump of days) at the end of which the Moon and its Higher Apsis are in conjunction at mean sunrise at Ujjain. This Lump, can, therefore be discarded and calculations need be based only on the remaining days (*khaṇḍaśeṣa*). Now, 6845 (*śivadūta*) anomalistic cycles of the Moon are contained in 1,88,611 (*paryāptahṛdaya*) days. Hence the anomalistic cycles completed during the *khaṇḍaśeṣa* is given by the expression:

$$\frac{khaṇḍaśeṣa \times 6845}{188611}$$

[2] *Rationale*: The remainder (of the division in 5) is, in fact, the number of days in the current anomalistic cycle *multiplied* by 6845 (*śivadūta*); hence the division of this remainder by 6845 to get days. It may be noted here that since 188611/6845=27 days, 33 *nā*, 16 *vinā*., the further *vākyasaṅkhyās* will successively increase by 27 or 28.

Zero-moments

Subtract (each of the nine) remainders (obtained above) from 6845 (*śivadūta*). Multiply the (nine) balances by 12 (*priya*) and divide by 1369 (*dhṛtālaya*). The (nine) results obtained will be in *nāḍikās* and are (to be called) Zero-moments (*Dhruvakāla-s*).[1] (8)

Zero-corrections

At the end of 5105 (*mānakāma*) (cycles) of the first (*dhruvāsadhana, viz*., the *agrimaphala* of *vv*. 5-6), the zero-correction, beginning with minutes, is 5r-24°-27′ (*sattvavān rāmaḥ*). For each increase of 69 (*dhṛti*) (cycles, thereafter), the increase in zero-correction is 7r-1°-44′ (*viśvaikanātha*).[2] (9)

(To get the *dhruva* for) the remaining cycles, multiply the same by 3 (*go*), getting thereby degrees, by 4 (*vi*), getting thereby minutes, and by 7 (*su*), getting thereby seconds; in the case of seconds, however, reduce them by 1/23 (of the number of the said cycles).[3] (10). (KVS)

परितालिका

21. 2. 3. साधयित्वा ध्रुवांश्चैव ध्रुवकालांस्तथानयेत् ।
आद्यमल्पतमं कृत्वा यथाऽधिकतमोऽन्तिमः ॥ ११ ॥

तैः सार्थं तत्र तत्र स्युः सह तद्वाक्यसंख्यया ।
तद्ध्रुवा स्वार्कमध्याय स्वसाधकफलान्विताः ॥ १२ ॥

अत्राप्यौत्पत्तिकोऽस्त्येव वेण्वारोह इव क्रमः ।
द्युनिशोरविशेषेण द्वयोस्तत्पार्श्वयोरिव ॥ १३ ॥

उपर्युपरि पूर्वस्माद् ध्रुवाः स्युः क्रमशः स्थिताः ।
वाक्यसंख्यास्तथाधोऽधो, व्यत्यये व्यत्ययाद् द्वयम् ॥१४॥

प्रमुष्टसम्प्रदायस्य प्रक्रियेयमुदीरिता ।
तत एवाञ्जसाऽमीषां भवत्यवगमोऽन्यथा ॥ १५ ॥

[1] *Rationale*:

$$\frac{\text{Remainder (in verse 5)}}{6845}\text{ days} = \text{Remainder} \times \frac{60}{6845}\ \textit{nā}.$$

